येनैव, पारमार्थिकं त्ववध्यादीनि न विरोधः । अन्यथा कथं तत्र
वाऽयमत् सूत्रकारो 'परोक्खं दुविहं तं जहा—आभिणिबोहियनाणं
सुयनाणं इत्यादि' । अन्यत्रापि 'इत्थं च मइसुयाई परोक्खमियर
च पच्चक्खं' इति । तथा 'आद्ये परोक्षं प्रत्यक्षमन्यत्' इति
सूत्रद्वयं नेति परमार्थतो मतिश्रुतयोः परोक्षतैव प्रतिपत्तव्या ।
ननु कि नाम परोक्षत्वमभिप्रेतं यत उच्यमानमेतत्सर्वमिति गम्य-
मिति चेत् अवधार्यताम्—अक्षशब्देनात्मा 'अक्षो व्यवहारावयवे
व्यवहारे विभीतके । पाशके शकटे कर्षे ज्ञाने आत्मनि रावणी
॥१॥ अक्ष सौवर्चले तुत्थे हृषीक' [हेम०] इत्यनेकार्थवचनात्
"अक्षा पाशास्य-शकट-व्यवहारेष्विति' मेदिनीवचनाच्च अक्ष
आत्मा । आहुश्चाभियुक्ता अपि—'अक्खो जीवो अत्थव्वावणभ
यणगुणण्णिओ जेण तेण' । यद्यपि अशौटि व्याप्तौ इत्यस्य
'मावाश्यमिषमिहनिभ्यानिभ्यो स्यान्निनोणादिः' [उ० ५६४]
सेत्स्य इति सपरीवारस्यात्मनेपदानुबन्धिनो ग्रहणात् तथापि
स्वस्वार्थव्यानिर्देशे सत्यपि अशन भक्षणे इत्यस्यापक्ष इति,
बाहुल्याद्वा भक्षणार्थपरस्मैपदिना व्याप्त सौत्रादिक । यद्यपि
गणेषु न इत्याख्यातो ऽस्ते पाणिनीये तथापि बाहुल्यात्त्यायनापि

ननु स्वनन्तरमुक्तयोस्त्वेकस्मिन्नेव सागरोपमाणि आयु आरण च द्वाविंशतिरिति द्वे अर्थाभ्यन्तरे तो, स्विमा द्वाविंशतया वा स्यादेव पदद्रव्यं, नवाभवस्याचित् एवाऽऽवाभावत्वमव्य इति। कारणतस्त्व यत साधर्म्य द्वयो तथाहि--मतिज्ञानं तावदिन्द्रियानिन्द्रियोद्भवम्। तथा श्रुतमपि 'सोइन्दियओवयद्धि' त्ति जवयग्गओ अ समेरा त्ति" च वचनात्। य च मतिज्ञानस्येन्द्रियानिन्द्रियोद्भवत्वस्वीकारेऽपि श्रुतज्ञानस्यानिन्द्रियोद्भवत्व "श्रुतमनिन्द्रियस्यार्थ इतिवचनात् स्वीकुर्वन्ति तथापि भवाज्जयसाधर्म्येणैव यथा हि--मतिज्ञानमनिन्द्रियप्रभवं तथा श्रुतमपि। यद्वा--यथा मतिज्ञानमात्मनः स्वावयवद्वारेण मनसामुपजायते तथा श्रुतमपि, पौद्गलिककारणालम्बन साधर्म्यम्। तथा विषयतोऽपि साधर्म्य द्वयो। यथा हि--मतिज्ञानी सर्वद्रव्याणि जानात्योघेन, तथा श्रुतज्ञान्यपि, तत एव "मतिश्रुतयोर्निबन्ध सर्वद्रव्येष्वसर्वपर्यायेष्विति दव्वओ ण आभिणियाहियनाणी सव्वदव्वाइ जाणइ त्ति, तथा 'दव्वओ ण सुयनाणी आहेण सव्वदव्वाइ जाणइ त्ति च पठ्यते। न च वाच्य मतिश्रुतयो सर्वद्रव्याणि विषय इति कथं श्रद्धेयम्?। घटध्यक्तिज्ञानं यथा समग्रघटज्ञानमनुभवसिद्धमेव अन्यथा देशान्तरे घटोपलम्भणाभावाद् घटावयवावभावाच्च, तथा यावत्पदार्थाना मतिश्रुताभ्यामपि बोधोऽवगन्तव्य। ननु घटपटादीना रूपिणामर्थाना भवतु वधविषयता सर्वथा, परमरूपिणा धर्माधर्मादीना कथ विषयता मतिश्रुतयोरिति चेन्। तान्यपि श्रद्धायवानुमादिना द्रव्याणि, श्रुत चास्त्यव तत्प्ररूपणा सप्रपञ्चमिति कथ तान्यपि द्रव्याणि नानयोर्विषय?। ननु सर्वे पर्याया अप्येवं भवेयुर्गम्या, तथा च कथमसर्वपर्याया इत्युच्यते? इति चेत्, न हि सर्वजानीया सर्वे पर्याया मत्या ज्ञायन्ते, श्रुतेना वगुध्यन्ते वा तेषामानन्त्यादिनाति युक्तमुक्तमसर्वपर्यायेष्विति।

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ [illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] अथवा, [illegible]
[illegible]

स स्यादेव । यद्वा-व्याप्त्यर्थादिभोरपि स्यादेवाऽक्ष इति । न च वाच्य 'योगाद् रुढिर्बलीयसी'ति न्यायोऽत्र बाधक, व्याकरण एवो पयोगित्वात्तस्य, व्याप्रतिपादिता या सर्वे रूढा एवार्था इतन या यगृहीता इति ध्येयम् । तस्मादक्षात् पर परोक्षम् । परशब्दसमा नार्थेन पर शब्देनाव्ययेनाप्ययर्थेन समासे परोक्ष इत्यादि । सत्य यचाता त्वभ्रादित्वादप्रत्यये भविष्यति, इन्द्रियानिन्द्रिययो पुद्गल रूपत्वात् स्पष्टमेव तदुद्भवस्यात्मन परस्त्वम । यद्वा-परस्मा सम्बन्धो यस्मिन्निति पराक्षम । इन्द्रियानिन्द्रिययो पुद्गलरूपत्वेन परत्व तदुत्पन्न च तत परोक्षमेव । यदाहु -अक्खस्स पोग्गलमया ज दव्विंदियमणा परा हाति 'त्ति । तदुद्भवमान च परोक्षम् । मतिश्रुत परोक्ष, पुद्गलजन्यत्वात, व्यतिरेके अवध्यादि । यद्वा-सम्प्रतिपन्ने परोक्षे साभासत्वात् अनुमानादिवत् । न च विभङ्गस्या भासता वधेयेन भवदवध प्रत्यक्षस्य साभासत्व, किन्तु मिथ्यात्वमा श्रयाधिकरणत्वेन तस्याज्ञानत्व जगीयते । न ह्यवधौ स भवति, येन भवत्सदाभासरूपम् । यद्वा-परोक्षे एते, इन्द्रियानिन्द्रियोद्भव त्वात् अनुमानवत । तदुक्त- दव्विंदियमणा परा तेण तहि तो ज नाण परावत्तमिह तमणुमाण व त्ति । न च वाच्य सर्वथा पर्याप्ता वस्थायामप्यभ्युपगम्यमान कथ पौद्गलिकम् न च वाच्य कामण शरीरस्य तथापि सत्त्वात्तदुद्भव तत्, तथा सति यावद्द्रव तन्मद्भा था प्रत्यक्षसम्भवमाप्युच्छृत्यपत्त न च कामणमति तयोपयोगता निरुपभोगमन्त्य मिति वचनादिति चेत । सत्य यथा हि तजमश रीरोपगृहीत आहारादिग्रहणाय व्याप्रियते तथा जीवस्वाभाव्यादेव तजसकामणाभ्यामुपगृहीता वेत्त्येव किञ्चित । न च को पि जीवा भिमतो विद्यत वा या न ज्ञानवान्, किन्तिप्टक्षयापशमाभा वाच्च तज्ज्ञानानियमोऽपि तदेति । कामणस्य निरुपभोगत्व च

वा अवधिज्ञानवान्नरो वा तिर्यङ् वा तदाऽवधिरपि विभङ्गत्वेन परिणमति। यदाहु -"आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम्" इति। पारमर्षमपि- सम्मद्दिट्ठिस्स सा मइन्नाण" इत्यादि। ननु च केयं चातुरी यत-सम्यग्दृष्टेरेव ज्ञानं, मिथ्यादृष्टेर्बोधस्त्वज्ञानमिति ?। न हि मिथ्यादृष्टिरपि घटं पटतया, पटं घटतया वा वेत्ति। यथैव सम्यग्दृष्टिः स्पर्शादिकं स्पर्शादितया जानाति, तथैव मिथ्यादृगपि। यथा च नरत्वेन नरमवगच्छति सुदृष्टिस्तथा मिथ्यात्वमोहितोऽपि। तत्र सम्यग्मिथ्यादृशोरस्ति द्रव्यगुणपर्याया णामध्यक्षाणां विशेष। विना विशेषं च कथमेकस्य ज्ञानत्वमन्यस्याज्ञानमिति निगद्यमानं विद्वन्मनांसि प्राप्नुयात् प्रमाणतामिति चेत सत्यं प्रथमं तावन्मेयमिदं यन्मिथ्यात्वं हि मिथ्यात्वमोहनीयोदयजन्य आत्मपरिणाम। सम्यक्त्वं च मिथ्यात्वक्षयोपशमादिजन्य प्रशमसंवेगनिर्वेदास्तिक्यानुकम्पाभिव्यक्तिलक्षणस्तत्त्वार्थश्रद्धानपरण आत्मपरिणाम। ज्ञानं चाप्यात्मस्वभाव इति मिथ्यात्वापवृहितात्मनो ज्ञानं मलिनं कुवासनया अन्यस्य तु नेति। दृश्यते चैकरूपस्यापि दीपस्य काचगृहस्थितस्यानेकविविधप्रभाविधायित्वम्, अत एव च तस्य जायमानं आवरणक्षयोपशमोऽज्ञानावरणक्षयोपशम इत्यभिधीयते अज्ञानावरणापाय मित्यादिना। तत एव ज्ञानधनविबन्धनताऽपि महापापनिबन्धनं मित्यननाभियुक्ततराभ्याय तेऽभ्य। अभिलापसादृश्यमात्रेण च न भ्रमो विधेया विधानकुशल। यथा ह्युन्मत्तोऽश्वमश्वं गां गामिति वक्ति यदि, न तावता तस्य स्वस्थता। स हि कदाचिज्जननी प्रियेयमिति, प्रिया च जननीयमपीति तथाऽयमपि घटादिकमेव व्यपदिशन्नपि न तावन्मात्रेण ज्ञानवत्ताऽभ्यामाप्तुमर्हम्, यद्वा-वदन्नपि नैव मनुतेऽसौ तथा। ------------ --- ज्ञानवत्ता ?। कथं नु मनुते चेदुच्यते-यै

[illegible]
[illegible]
[illegible]
[illegible]
[illegible] [illegible], [illegible] [illegible] । [illegible]
[illegible]
[illegible] , [illegible]
[illegible] । [illegible]
[illegible]
[illegible] ।
[illegible]
[illegible] । [illegible] , [illegible]
[illegible]
[illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible]
[illegible], [illegible] । [illegible]
[illegible] — [illegible] ।
यदि [illegible] । [illegible]
[illegible] । [illegible]

सत्त्वमसतोऽपि । ततश्च स्पष्ट एव सदसतोरविशेष इति । न च भिन्नोऽभ्युपेयतेऽभावो भिन्नाभ्युपगमेऽपि घटादेस्तत्प्रसङ्गवारणाभावात् । यद्वा—यथा मृत्तिकाया घटाभावस्तथैव तन्त्वादौ, यथा च तन्तौ पटाभावस्तथैव मृत्तिकादावपि स्पष्ट एव सम्सतोरविशेष, मृत्तिकाया कारणरूपेण घटस्य तन्तौ च पटस्य सत्त्वे घटस्य तन्त्वादौ पटस्य मृत्तिकादौ चासत्त्वे त्वविशेषपात । न च वाच्य नैयमापत्ति सत्कार्यवाद इति । तत्रापि यथा निष्पन्नघटे घटाभाव सद्भावे घटत्वाभ्युपगमस्तथा मृत्तिकायामसत्यपि तथानारे घट त्वाभ्युपगम इति स्पष्ट एव तेषामपि सदसतोरविशेषो, न स्यादेव यमापत्ति । यद्यपि अभ्युपगम्येत कारणतया सत्त्व कार्यतया चासत्त्व कार्यस्य कारण । न चैवमभ्युपगमो विना सम्यग्ज्ञानाऽन्यथा, त स्याद्वा दस्यानभ्युपगमात् । अथ भवति च जात्य धाना मूयाघ भ्रमसो हिन्नस्य चित्र चित्रकारितेति । अन्यच्च—तरेका तेन सदेवासदेव वेति प्राप्यत, तथा च वर्तमानगुणपर्यायमात्राभ्युपगमेनातीतानागतानां गुणपर्यायाणां सत्तामसत्तां चापादयन्त कृत प्रतिषेध इत्यपि सदसतोरविशिष्टत्व तेषामिति युक्तमेव मिथ्यात्वमस्मानित्वम । पनिपादित च पूज्यपाद — ''सदसतोरविसेसा 'ति ' सयसयविसेस-णाओ'' इति च । अपर चायोऽयाऽभावस्याधिकरणस्वरूपेण स्पष्ट एव सदवासदेव वेत्येकान्तपक्षव्याहति । यतो यथाऽन्यताभावे व्यपदिश्यते भूतले न घट इति नान्योऽन्याभावव्यपदेश तद्वत्, किन्तु नाय घट पटो वेत्यादिना सद्वस्तुवाचकेनैव गवनाम्ना । तथा सति च स्पष्ट एकान्तसदादिव्यपदेशस्तथा स्वाभ्युपगम-विरोधीति । अन्यच्च—सैव हि शास्त्र हेयोपादेयापेक्षणीयानां हानोपादानापेक्षाविधानक्षमतयाऽऽप्यतामर्हति तेषां च मिथ्यात्विनां सता यथार्थश्रद्धानाभावाद् हेयानुपादत्ते उपादेयतया अभिमन्य त

स यथाया ऽवादीत् उपान्योऽच मुख्यमुपमुपममवर्गारजन्मीन
यथायवर्तुपितराया मिथ्यात्वमोहितमतिरनपद्रियविषयगृध्नुप
तया च नोपान्त्य । न तोषाद्यनया गाचयति । नथथोपदर्शीयाना
ऽक्षोणाग्नेन वाऽधिहितानुपमयति तत्त्वभावपरिज्ञान गि रिनि
प्ताम्नाममनारिरखण्डिनया यथाशेष्यस्यारिद्धक्षगन्नया अनाम
वगवन्नया च विदस्त वासादिर पानयति च [illegible]
पयद्धार यथानद्धरानीतिति न तदामुपमपि पान [illegible]
तम्यस । यच्चाणादीयत मयचन्नाति ईयन मण्टपादि उपेन्दन
च स्यात्राति न तमगमार्येना वियरमया निमन्न योग्य [illegible]
भ्रमयामनान्धधमतया नरव मस्यान्न स्पष्ट एव [illegible]
निम्नानेनैति बराणाणा तेषां प्रत्युत च मादव मथम[illegible]
मुच्यत इति यथा भवहेतुनामिति स्पष्टयाणाना [illegible] । [illegible]
सम्यग्दृणामपि न स्थिरनिमित्ता चतुर्थगुण विरतेरभावा[illegible]
पञ्चमे च सयामपि देशता विरतौ बहूनगया अविरत [illegible]
थय नैषा सम्यग्ज्ञानमिति चेत सत्य तथा श्रद्धान [illegible] ।
यद्यपि कर्मनियोगाद्धिन्यसे हेयादिषु प्रवर्तते [illegible]
तथापि न तन्नीया वाञ्छा तेषां, वाञ्छा तु तथा हे[illegible]
यत आहु – एव त्वपूर्वकरणा सम्यक्त्वाम[illegible] ।
चिरकालासंचितमपि न जातु बहु मन्यते पाप[illegible]
नियागात्करोति तत्तदपि भावशून्यमेव [illegible]
साप्यवमेय–"पाव न तिव्वभावा कुणइ [illegible] । [illegible]
श्रद्धानेऽपि प्रवृत्तिश्चेद् हेयेषु निष्प्र[illegible]
दशामिवरयणानतवनि याच्यम्, तथा[illegible]
हेयाद्हानादेरवश्यभावात् । यदाहु –[illegible]
सद्गतिमाप्नोमि" इति । यदा–[illegible]

न च कथ मम्यग्दृशा ज्ञानविरत्यमिति वाच्यम यतो निश्चयन यन फल्बदेव कारण प्रतिपाद्यत, यारत्वसम्यक्त्वम्यव तनाभ्युप गमात, यमाश्रित्याभिममोदयत सिद्धान्तोऽप्येव—"ज सम्मति पासहा त मोणति पासहा, ज मोणति पासहा त सम्मति पासह' ति। न च भवति कदाचिदप्यनभिप्रायेण ज्ञानिनो विरसा प्रवृत्ति मोहाद्यरलि तत्त्वाल्लेप तेन तज्ज्ञानमेव। न हि भवत्य घतमस निनरा भाभरभामितभुवनाभोगे भास्वत्युदिते, तथोक्त—"तज्ज्ञान मेव न भवति यस्मिन्नुदिते विभाति रागगण। तमस कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रत स्थातुम् ॥१॥ इत्यादि। अत एव च पारमर्षेऽप्यविरताना मम्यग्दृशामपि ज्ञानस्य अंगीयत। व्यवहारेण तु कुशलस्थबीजानामङ्कुरकारणतावत श्रद्धानस्यापि विरति-कारणतामविकल्पामनुसन्धायाभिधीयत, तेषामपि ज्ञानस्य, प्रत्यक्ष सम्यग्मिथ्यादशाध्यवसायतारतम्यानुभवात्। एतदेव सम्यग्दृशा प्रशमादिमत्त्व—यन्न कुध्यन्ति तथा, न च भवे रज्यन्ति। न च विहायापवर्ग परमानन्दपदमभिल्पन्ति परमिति स्पष्टव तन ज्ञानिताऽभ्युपगम्यते तेषामविरताना, देशविरताना तु स्पष्टव ज्ञानिता व्यवहारेण। निश्चयन तूभयमेवाभ्युपगम्यते यत उच्यते तेषा "बालपण्डितत्वमिति'। तत्त्वतस्तु हेयोपादेयोपेक्षणीयास्ति-भावेन श्रद्दधानाना ज्ञानत्व सम्यग्दृशामविरताना देशविरताना चाभिप्रायसौष्ठवात। अत एव भाष्यते— सम्मद्दिट्ठी जीवो जइ वि हु पाव समायरइ किंची। अप्पो सि होइ बधो जण न निद्धधसा होइ ॥१॥' इति। 'समत्तमि उ लद्धे विमाणवज्ज न बधए आउ' इति च। न च वाच्य कथमभिप्रायसौष्ठवेऽनुचिता प्रवृत्ति सम्पद्येत?, तस्या अभिप्राय कुत्सित सत्येव भावादिति। कर्मनियोगादित्यनन्तर पूर्वमेव समाहितत्वात्। सत्यभिप्राये

कुत्सिते स्पष्टमेव निरपेक्षत्वं, तच्च नैव सम्भवति सम्यग्दृशाम्, यत एवोदितं प्राक् "जेण न निद्धयसा होइ" त्ति। न च प्रवृत्तिमात्रस्याभिप्रायपूर्वकतानियमः सुप्तमूर्छितादावतिव्याप्तेः। अथ यादृशीयं प्रवृत्तिरिति चेद्, अस्तु न त्विच्छापूर्विका प्रतीकारतया वा प्रवृत्तस्तत्प्रवृत्तिरिच्छारहितेव स्पष्टमेव। तथात्वे च यत्स्वदनिष्टानुसन्धानादिति। अत एवोच्यते– भवहेऊओ त्ति। न च मिथ्यादृशामिव सम्यग्दृशां ज्ञानं भवकारणमपाढपुद्गलेनाप्यपवर्गसमापकम्, अन्यथा तु नानन्तत्वं नियम इति तथा ज्ञानस्य भवकारणता। यद्वा–भगवदागमः सम्यग्दृशां यथार्थ्यमार्गावभासकः सद्वारि गमनया समारोप्यबुधिपाद्यती स एवायेषां व्यसनीलः परमिव व्याधिवर्द्धिः विपरीतज्ञापनयाऽवसाम्पदनया च भवविपर्ययबुद्धिमेव तनुते। उदितं च "स्याद्वादरत्नायतनमश्रद्धानं श्रुतं तथाविदतां पथ्यं पुनः पुनर्निरन्तरतुष्टये" ति। यथार्थमेव तेषां ज्ञानस्य भवहेतुत्वम्। अन्यच्च–सम्यग्दृशां ज्ञानं निर्णीतविषयावबोधानां भगवतां यद्विनामुक्ते तदनुसारेणावाप्नोति जन्म, वदते च प्रामाण्यमपि तस्यैवमनवने यतदनुसारि तमेव सच्चं निस्संकं जं जिणेहिं पवइयं इतिविचारस्य सर्वज्ञानुगतत्वात् अनृतभाषिता च भगवतां न कदाचिदपि सम्भवति तद्धेतूनां रागद्वेषमोहानां समूलकाषकषितत्वात्। यत उच्यते–"रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्। यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात् ॥१॥" इत्यादि। तथा च न सम्यग्दृशां यादृच्छिकं ज्ञानम्। न च [illegible] ज्ञानसम्भवो विज्ञातृज्ञानानुसारिज्ञानत्वात्। [illegible] स्थाने पूर्वपुरुषाः 'केवलिनो' विदन्ति, [illegible] दुर्गमनिर्णयं व्यपदिश्यते। एष एव च [illegible] महिमा यत नान्यथा यथाप्ररूपणा सिद्धान्त [illegible]

एव विचित्रकमप्याश्रित्य सिद्धान्तम्। यदाश्रित्योच्यते—"यदाऽर्जे वादुक्तमयुक्तम यस्तद यथाकारमकारि शिष्यैं । न विष्लवाऽय तव शासनेऽभूदहा ! अधृष्या तव शासनश्री ॥१॥' तथा "स्वपक्ष एव प्रतिबद्धमत्सरा, यथाऽयशिष्या स्वरुचिप्रलापिन । निरक्तभूत्रस्य यथार्थवादिना, न तत्तथा यत्तव कोऽत्र विस्मय ॥१॥' न चैतत् स्वरुचिप्रलपित स्तुतिकृतां, यत उपनिषदोऽभ्युपगच्छतामपि नयायिक–वशेषिक–साङ्ख्य–जैमिनीय–वेदान्तिना परस्पर विरुद्धा सहस्रश प्रलापा, आत्यायन्ते च तरयथाकारम यथाकारमथा श्रुतीना स्वस्वरुचिविरचितभिन्नभिन्नव्याख्यान । विस्तरस्तु तत्त च्छासनदासितार्थावगमावगम्यो भवो न्हशतो दृश्यते च, यत तेषा तदनुसारेणान्येषा च यादृच्छिकमानवत्व प्रसिध्यति–वेदा एव तावत नकिंचिदीश्वरप्रतिपादिता सकतका पौरुषेया अभ्युपगम्यन्त बुद्धिपूर्वा वाक्यकृतिर्वेद ' इत्यादिना । तदा कश्चित् स्वयमेवाना दिसिद्धा इति व्यपदिश्यन्ते 'तस्मादतीन्द्रियार्थाना साक्षाद्द्रष्टुर भावत । नित्येभ्यो वेदवाक्येभ्यो, यथार्थत्वविनिश्चय ॥१॥' इति । उक्तं तु शब्दपूर्वत्वमिति च यत आख्यायते । अत्र चिन्त नीय तावदसवस्वाभिलषितसिद्धिनिव बन्धु वदेष्वपि न स्वरूपतो निर्णय । तपदरारविषयेऽपि न ते एकशास्त्रानुसारिणो पि कश्चिदेव सिद्धान्तमाश्रिता साङ्ख्यादिवा । कचित्तावदनाभ्युपगच्छन्ति, वेदान्तिनास्तु जगदुपादानरूपमभ्युपगच्छन्ति, नयायिकवशषिका पुनदृश्यमानचराचरजगन्निमित्तकारणतया स्वीकुर्वन्ति । आत्मान मप्याश्रित्य केचित वेदान्तिन एक एवात्मा 'एक एव हि भूतात्मा भूते भूते व्यवस्थित इत्यभ्युपगच्छन्ति प्रतिपादयन्ति च द्वितीया द्व भय भवति, तथा 'नेह नानास्ति किञ्चन इत्यादि । साङ्ख्या-दिकास्तु जन्मादिव्यवस्थान पुरुषबहुत्वम तथा पाठनश्रुतिविरोधो,

जातिपरत्वात । तथा वामदेवादिमुक्तौ 'नाद्वन मित्यादि प्रतिपाद-यन्ताऽजेकात्मत्व स्पष्टयति जावात्मनाम्। अपि च–कश्चित 'नि सङ्गोऽय पुरुष ' इत्यादिना न कर्तृत्वमभ्युपगम्यन, अभ्युपगम्यते च प्रतिविम्बादयायन केवल भोक्तृत्वम्, तदाऽन्य शुभाशुभकर्मणो कर्तृत्व भोक्तृत्व चेति द्वयमप्यभ्युपगम्यते। जीवात्मनां मुक्तिरपि कश्चित पदार्थषटकज्ञानात कैश्चित्तु षोडशपदार्थबोधात, कैश्चित् श्रवणमननादिभ्यः कैश्चन ज्ञानमात्रात्प्रकृत्यादीनां कर्तिभिश्चाविद्यानिवृत्तिमात्रात् इत्येवमनेकधोऽङ्गीकृता। मुक्तिरपि कैश्चिच्छुभाशुभादृष्टनाशरूपा कैश्चनैकविंशतिदुःखध्वंसरूपा, कैरपि प्रकृतिवियोगरूपा कैश्चित्कर्तिभिश्च ब्रह्माभेदरूपा एके केचन तु विशेषगुणोच्छेदरूपा। कैश्चित्पुनर्न मुक्तिर्नच मुक्तिसाधनमभ्युपगत भवन वाशभावानैवेति। कियन्तो दधिमापभोजनात कृष्णा विवक्ष्या। एवमेव बौद्धानामपि योगाचार–सौत्रान्तिक–वैभाषिक–माध्यमिकाद्या विचित्रतमा भेदा शून्य–क्षणिक–ज्ञानमात्रादि विचित्रवासनाविभावुक बुद्ध व्याकुर्वाणा परस्परविरुद्धव्याख्यायका एकसूत्रानुयायिनोऽप्यवगन्तव्या। अत एवोक्त "यान्छित्रोपल ब्धिमन्तो मिथ्यादृश' इत्येतानेव तेषाम्। सम्यग्दशा चातीन्द्रियार्थदर्शनागमानुसारित्वेन परम्परागततदर्थसत्यताभिसंधिमत्ता च न कथञ्चनापि यान्छिकत्वम्। अत एवोच्यन 'सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः। मिथ्यादृष्टि सूत्र न प्रमाण जिनाभिहितम् ॥१॥' इति। तथा–"पयमक्खर च इक्क जा न राएइ सुत्तनिद्दिट्ठ। सेस रोयता वि हु मिच्छादिट्ठी मुणेयव्वा ॥१॥ इति। एतदेवाभिसंधाय तत्त्व निवारिताऽभेदेऽपि व्यञ्जनभेदो व्यवहारेण। तत्त्वतस्तु तत्राप्यर्थभेदाभ्युपगमात्तय भेदेन, तथा च व्यञ्जनार्थतदुभयभेदनिवारणमेव "...

द्वारागलायमानं समापयति सम्यग्दृष्टिसाधनम्, तदनुसारिणा च न कदाचनापि यादृच्छिकज्ञानसद्भावः । विवृतं चात एव–"जिणमयं मह पमाणं" इत्यादि । तथा सम्यग्दृशां ज्ञानं आश्रव–बन्ध–संवर–निर्जरा–मोक्षाऽनुगतत्वेन यत्र तत्रोत्पद्यमानं कल्पतेऽपवर्गपदप्राप्तये । एवमेव 'जन्मभिरष्टत्र्यकैः सिध्यन्त्याराधकास्तासाम्' इत्यादिना प्रतिपाद्यमानं फलं सङ्गच्छते । रीत्यैवाऽनया सुबुद्धचमात्यस्याश्वक्रीडनेऽपि दुर्गन्धतरपानीयपूर्णपरिखाजलेऽपि न जुगुप्सा, किन्तु पुद्गलस्वभावचिन्तनं, वासुदेवस्यापि विदितसारासारविवेकस्य पूतिकुथितश्मण्डलदुर्गन्धविदारितनासिकादरेऽपि शुने न मनागपि जुगुप्सा, किन्तु मरकतततिरिव विराजमाना च्छदतति समक्षं प्रशंसिता श्वानाम्, यत्प्रभावाभिशमितपूर्वतत्प्रशंसाकोऽमरोऽर्पयामास तस्मै रोगोपशामिनीं भेरीं प्रजावत्पाल्यमानप्रजापकाराय याचितां सन्ति । अभयादीनां चाप्यनेके धर्ममयाः प्रबन्धा राजसभागताः श्रूयन्ते । इदमेव च तेषां समानिकाऽऽयुष्यस्य कारणं समवगन्तव्यम्, पुण्यानुबन्धिपुण्यरूपत्वात् कुशलानुबन्धित्वात् पूर्वोक्तावदपवर्गानुबन्धिता तेषामिति । न चैवं परेषां, तेषां तु परिग्रहारम्भमानत्वेनाविदितबन्ध–मोक्षहेतूनां प्रवर्तते बुद्धिः शास्त्रीया बालवधं यत्र तत्र ममताऽन्धितया बुद्धया विचारः । तथा च स्पष्टमेव तेषां ज्ञानफलाऽभाववत्त्वमायातं तत्त्वतो हेयहानादिफलमाम्नायते आम्नायवेदिभिः, तच्च न तेषामिति स्पष्टत्वाज्ञानितेत्यनुसन्धयमनभिनिवेशानं । तदुक्तमेतत्सर्वमभिप्रेत्य भाष्यकारपादैः –'सयसयविसेसणाओ भवहेउओ जहिच्छिओवलभाओ । नाणफलाभावाओ मिच्छादिट्ठिस्स अन्नाणं ॥१॥' इति । नयहृत्वारमिश्रैरपि "सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत्" तथा "आद्यत्रयमज्ञान-

पीति पुनरत्रैव स्वामिसाधर्म्यं वर्ण्यमानमिति। तथा लाभसा-
धर्म्यात्। यदा हि सम्यक्त्वमश्नुते देवो नारकोऽज्ञानत्रयान्वितो
नरस्तिर्यङ् वा तदा मतिश्रुताज्ञानयोर्विनाशेन मतिश्रुतज्ञानयोर्लाभः,
तथैव विभङ्गस्याप्यपगमेऽवधिज्ञानस्य लाभो, मिथ्यात्वनिबन्धन-
त्वादज्ञानतायाः, ज्ञानतायाश्च निबन्धनं सम्यक्त्वमिति युक्त एव
मिथ्यात्वस्यापगमे लब्धे च सम्यक्त्वेऽज्ञाननाशेन सज्ज्ञानलाभो
भवत्येव। विषवेगापगमे स्वस्थचेतनक्रिया, निशस्ते वा सफलत्वं
क्रियाणाम्। अत एव चार्वागदशपूर्व्या परमश्रुतस्यापि मिथ्या-
ज्ञानताव्यपदेशः परतस्तु "चउदस दस य अभिन्ने" इत्यादिना
सम्यक्त्वनियमात् सम्यग्ज्ञानता, मिथ्याश्रुतमपि सम्यग्दृष्टिपरिग्रह-
पूतत्वेन सम्यग्ज्ञानमिति च 'सम्यग्दृष्टिपरिग्रहपूतं जयति श्रुतज्ञानं"
तथा 'जं पि दुप्पावयणीयं" इत्यादि च सङ्गच्छते। आप्तोक्ततया
चान्यजनैर्ग्राह्यमाना सम्यक्श्रुतता यत्किञ्चिज्ज्ञाऽवीतरागादिना येन
चान्यथा मिथ्याश्रुतता व्यपदिश्यते। तत्त्वतस्तु परिग्राहकाध्य-
वसायविशेषेणैव समीचीनता विपरीतता वा श्रुतस्येति न कश्चिद-
प्यनाश्वास इत्यलं प्रसङ्गेन। तदेवं काल-विपर्यय-स्वामित्व-लाभसा-
धर्म्यतो मतिश्रुतयोरानन्तरीयकतयाऽवधेरुपन्यासः। तदिदमाहुः पूज्य-
पादाः — 'काल विवज्जय सामित्त लाभसाहम्मतो तओ अवहि' त्ति।
ननु च चतुर्थस्थाने किमिति मनःपर्यायमभिहितं, न केवलम्?
इति चेदुच्यते मानसमात्र छद्मस्थत्व विषय-लाभ प्रत्यक्षत्वादि-
साधर्म्यात्। यथा हि निखिलानि रूपिद्रव्याण्यवधिमान् समीक्षते
विनेन्द्रियानिन्द्रियसाहाय्यम् तथा मनःपर्यायज्ञान्यपि मनोलक्षणानि
रूपिद्रव्याणि वेत्ति विनैवेन्द्रियानिन्द्रियसाहाय्यमिति रूपिद्रव्य-
लाभसाधर्म्यं मनोमात्रग्रहणादेन। तथा यथा हि छद्मस्थ
स्यैवावाप्नुतेऽवधिज्ञानं तथा मनःपर्यायज्ञानमपि। न हि मनःप-

र्याप्यादेऽपि निखिलावरणविच्छेद कारण न वक्तीयमनेन केवलिना भगवता द्वयमप्येतद्भवति, परिमितवस्तुपरिच्छेदात्मक त्वादि द्रयवत्। केवल त्वनन्त, यतो द्वितीयमतेन सदपि नापयो गौनि प्रतिपादितमेव प्राक्। अथवा-यथा छद्मस्थोऽपि तृतीयस्मिन्न वधिज्ञाने छद्मस्थ इति व्यपदिश्यत तद्वत्संयत एवं मन पर्यायेऽपि व्यपदिश्यते इति छद्मस्थस्वसाधर्म्यम। तथा विषयसाधर्म्यात्, यथा हि रूपीण्येव द्रव्याण्यभिगच्छत्यवधिस्तथा मन पर्यायेणा ऽपि। ननयोरेकतरमपि वस्त्वरूपाणि। न च वाच्य मन पर्यायवा ज्ञि चिंतित मन्तिना पर्याप्तत्वेन वेत्ति चिंतित बाह्यमपि स्यात्मिति कथ मन पर्याय रूपिविषयमिति। चिंतितान वस्तु साक्षात किन्तु चिन्तापरिणतानि मनोद्रव्यपुद्गलानेव, चिंतितास्तु बाह्यान् केवलानुमानेनैव "जाणइ वज्झऽणुमाणाओ इतिवचनात। तथा चावधिमन पर्यायेयो समान एव विषय । तथा यथा ह्यवधिज्ञान क्षायोपशमिकमुदीर्णक्षयादनुदीर्णस्य विपाकत उपशमेन, प्रदेशतो वेदनेन क्रमश स्पष्टतादिरपि भवत्यस्यवमेव तथा मन पर्यायमपि क्षायोपशमिकभावाभावनमपि। केवलान्यतरनुपपत्तिरन्यथा। ततश्च भावसाधर्म्यम्। तथा यथा ह्यवधिज्ञान केवलमात्ममात्रहेतुका-त्वात्तिवत्तथा प्रत्यक्षमिति व्यपदिश्यते तथा मन पर्यायमपि, ततश्च प्रत्यक्षसाधर्म्यम्। स्पर्शनादि तु सांव्यवहारिक प्रत्यक्ष न पारमा-र्थिकमिति तूक्तपूर्वमेव। तथा यथा ह्यवधिज्ञान विकलप्रत्यक्ष देशप्रत्यक्षीकरणाद्व्यपदिश्यत, तथा मन पर्यायमपीति विकलता साधर्म्यमिति। प्रतिपादितव तच्च जिनप्रवचनानुयोगभुवनाभाग प्रदीप्रदीपायमानातनुबुद्धिप्राग्भारा श्रीजिनभद्रगणिक्षमाश्रमण पादा – म णसमत्त छउमत्थ विसय भावादिसामग्गा" इति। अत्रा दिश दन प्रत्यक्षता विकलतादिग्रह । केवल तूत्तम वादसर्वेव यति

स्वामित्वात्। न च वाच्यं गृहिलिङ्गादीनामपि केवलभावात्
धर्मस्याप्तिरिति। तासामपि तदवस्थाया न भावचारित्रेण विना केवल
ज्ञानलाभो। अतएव "सिज्झति चरणरहिया" इत्यपि व्याख्यात
व्यम्। द्रव्यचारित्ररहिता इत्येव ह्यस्यार्थः। कषायमोहनीयादि
क्षयस्य भावचारित्रं विनानुपपत्तेर्युक्तमुच्यते यतिस्वामित्व
साधर्म्यम् परमतायाः विशेषो यदुत– मनःपर्याय तु न द्रव्यचा
रित्रमन्तरापि। यद्वा–अवाप्तकेवलज्ञानस्य सत्यायुषि प्रभूते द्रव्य
प्रव्रज्ययापि प्रव्रजत्येव, अन्यथा देशादिकृतमहिम्नाऽव्याघातात्। स्पष्टं
चैतद् भरतेश्वरादन्तःपुरन्दरस्य तथावचनेनेति स्यादेव यतिस्वा
मित्वसाधर्म्यम्। यद्वा–यतिशब्देनाऽप्रमत्तता गृह्यते, परमार्थत
स्तस्या एव यतित्वात्। तथा च यथा मनःपर्यायमप्रमत्तस्य प्रादु
र्भवति, तथा केवलमप्यप्रमत्तस्यैव। न च मतिश्रुतावधयस्तथापि
सुकरमप्रमत्तस्वामित्वेन साधर्म्यमिति। तथाऽवसाराऽलाभात्।
तथाऽऽवरणविच्छेदस्य ग्रहात्। न च ल्ने एतस्मिन्नयत् प्राप्ताऽव
भासमवर्तिष्यत लभ्यते वा। सूर्योदयेऽपतजम्बुद्वीपालोकनमिव।
तदिदमाह–"अते केवलमुत्तमं जहणामित्तावसाणमाओ" त्ति।
न चैव परममत्र, छाद्मस्थिकज्ञानस्य क्षायोपशमिकत्वात् परिगणितत्वात्,
केवलं क्षायिकस्यैव साधर्म्यं दर्शितम्। अत्र तु मनुष्यों क्षायोपश
मिकानां मतिश्रुतादीनां प्रस्तावः। अनुत्पत्तिस्तु ज्ञानपञ्चकस्य गम-
यागमराज्ययापा, विस्तारभयात् प्रायान्यवर्णितस्याप्य नामान्त्र।
यथा श्रुतमत्र पर्यायपर्याभिधान्यनानक्षुपगमा य ख्यापि नयविचारा-
पक्षाद्युपलक्षित। तथा अज्ञानत्रय मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानस्य
पूर्वोक्तमतिश्रुतावधिविपर्ययस्वरूपम्। न च वाच्यं कथ नायज्ञान
मत्र पर्यायादि मत्यादिर्विदिति पयस्तत्रायुगस्य मिथ्यात्वसङ्गावे
उत्पादयोगात् मति च सम्यमिथ्यात्वान्यस्यथाभावस्य। तत्

एवोच्यते "मतिश्रुतावधयो विपर्ययश्च" [तत्त्वार्थ०] इति। तथा "आद्यत्रयमज्ञानमपि" इत्यादि च। ननु च कथं भवत्याद्यत्रयस्याज्ञानता ?। न तावत् कर्मोदयात्, तथा सति तस्यौदयिकप्रकरण पाठप्रसङ्गात्। सति चौदयिकत्वे ज्ञानाभावरूपमज्ञानं भवेत् न तु कुत्सितं ज्ञानमज्ञानमित्यभिप्रेतरूपम्। सति च क्षायोपशमिकत्वेऽस्यावरणविलयप्रभवत्वे आवारकस्याज्ञानस्याभावात् स्पष्टमेव ज्ञानत्वापत्तिः आवारकस्याज्ञानत्वे च न किमपि प्रयोजनं क्षयोपशमेनाज्ञानाविर्भावकेनेति चेत्, नैवम्, अभिप्रायापरिज्ञानात्, मिथ्यात्वसहचरितत्वेन ज्ञानस्यैवाज्ञानताव्यपदेशादिति पूर्वमुक्तमेव। एवमेव मिथ्यादर्शनसमज्ञानावरणीयक्षयोपशम इत्ययमप्ययमेव पन्थाः। न ह्यज्ञानावरणाभिधानं कर्म पठ्यते कर्मप्रकृतिविवेचनेऽभियुक्तैः किन्तु मिथ्यादृशां ज्ञानावरणक्षयोपशमेऽप्यज्ञानस्यैवाविर्भावादुपचर्यते यदज्ञानावरणक्षयोपशम इति। सदसदविशेषादिना चाज्ञानता मिथ्यादृग्ज्ञानानामित्यपि निर्णीतमेव पूर्वम्। ननु च विभङ्गस्यावधिविपर्ययत्वेन प्रत्यक्षरूपत्वात् कथं विपरीतबोधकत्वमज्ञानत्वं च कथं तदभाव इति चेत्, सत्यं, प्रत्यक्षपरोक्षताकृत एव हि भेदोऽत्र मतिश्रुतावधीनां परं श्रद्धानाभावकृतमज्ञानत्वं तु कथञ्चनापि विषमतावहमिति तस्याप्यज्ञानता। ननु प्रत्यक्षे कथमज्ञानतेति चेत, यथा घटादिप्रत्यक्षं मत्यादिमतां तद्ज्ञानानि त्रीण्येवेति। तथा दर्शनेति। दर्शनत्रयं चक्षुरचक्षुरवधिभेदेन तत्र, "चक्षिङ् व्यक्तायां वाचि" इति धातुस्तस्मादौणादिके "चक्षे र्शिद्धा" [१००१] इत्युसि चक्षुः सिद्धिः। तथा च चक्षतेऽनेनेति, चष्टे वेति वा चक्षुः। प्रेक्षणीयं हि पदार्थमवश्यमेव चक्षुषा चक्षते जनाः। ततश्च चक्षुरक्षीत्यर्थः। तथा दृश्यते–प्रेक्ष्यते–सामान्यतोऽवबुध्यतेऽनेनेति दर्शनं, दृष्टिर्वा दर्शनमिति सामान्यमुख्यको बोधः। व्युत्पत्तिद्वयेऽपि

'करणाधारयो" इति अनट 'क्लीव' इति चानट। चक्षुषा चक्षुषो वा दर्शनं चक्षुर्दर्शनमिति। यद्यप्यत्र दर्शनशब्दो बोधार्थ एव सामान्येन तथापि विशेषबोधस्यावग्रहादिरूपस्य चाक्षुषमतिज्ञानरूपत्वात् सामान्यमुख्यबोध गृह्यते बोध यत उच्यते-"जं सामन्नग्गहणमत्थाणं नेव कट्टु आगारं। अविसेसिऊणमत्थे दसणमिइ वुच्चए समए ॥१॥' इति। पदार्थश्च सामान्यविशेषोभयात्मको यतस्ततो नानन्तरतया क्रमेण विशेषाणां च सामान्यस्य च ग्रहणमिति। न च वाच्य कथमनाकार ग्रहणं स्यादिति स्वस्वोत्तरापेक्षया सामान्यवाद विशिष्टाकाररहितत्वमनुसन्धेय, परमादिसामान्यग्रहस्यैव दर्शनत्वमिति। तथा च-'सामन्नमत्तगहणं नच्छइओ समयमोग्गहो पढमो। तत्तोऽणंतरमीहियवत्थुविसेसस्स जोऽवाओ ॥१॥' सो पुण ईहावायावेक्खाओ वग्गहोत्ति उवचरिओ। एस विसेसाविक्ख सामन्न गिण्हए जेण ॥२॥ तत्तोऽणंतरमीहा तत्तोऽवाओ य सव्विसेसस्स। इय सामन्नविसेसावेक्खा जावंतिमो भेओ ॥३॥ सव्वत्थेहावाया निच्छयओ मोत्तुमाइ सामन्नं। संववहारत्थं पुण सव्वत्थावग्गहो वाओ ॥४॥ तरतमजोगाभावे वाओ च्चिय धारणा तदंतम्मि।" इत्यपि सङ्गच्छते। सदृच्छने च नाणमवायधिइओ" इत्यादि च। चक्षुरितरत्वेन विभागश्च दृष्टिव्यपदेशानुरोधेन यद्वा-चक्षुषोऽस्फुटस्पष्टग्रहणाहत्वेन स्पष्टतादर्शनपरं, यत उच्यते-'पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु। गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥१॥ इति। दृश्यते च गुप्टयादे महत्त्वे सत्यपि न स्पार्शनविषयता, चाक्षुषविषयता तु तस्या अपि विद्यते इत्यनुभवेनापि चक्षुष पाटवमिति। यद्यपि मनोदर्शनमप्यदर्शनं चाप्यचक्षुर्दर्शनेन व्यपदेश्यम्, पाटवतरत्वं च मनस, तथापि व्यवहारानुरो

धेनेत्य विभाग । तथाऽचक्षुषा-चक्षुवर्ज्यशषेन्द्रियचतुष्केण "अचक्खु नपुमिच्छि सव्वे वि" इतिवचनादचक्षुर्दर्शनरहितस्य कस्याप्य भावा मनोदर्शनमोघदर्शनं चापि ग्राह्यम्। ननु चक्षुषा दर्शनमिति सर्वजनप्रसिद्धम्, पर कथमचक्षुषा दर्शनमिति चेत, सत्य, पश्यति सामान्यमुख्यार्थं इह गृहीत । सामान्यमुख्यको बोधश्च शेषेन्द्रियादिरपि भवत्येव, अन्यथा विशेषबोधाभावाच्छद्मस्थाना सामान्यबोधपूर्वकत्वनियमाद्विलोपनीयस्येति। पठ्यते च-"आत्म वत्सर्वभूतेषु य पश्यति स पश्यति" । तथा पठ्यत उपसर्पन्त सर्पं बुद्धयव पश्यतीत्यादौ सामान्यबोधमात्रे पश्यति । कोशकारैरपि-'दर्शन दर्पण धर्मोपलब्ध्योर्बुद्धिशास्त्रयो । स्वप्नलोचनयोश्चापि,' इति व्युत्पादित एव दर्शनशब्द उपलब्धौ ज्ञानसामान्यवाच्यापि बुद्धौ चेति। तथा च चक्षुरवधिकेवलव्यतिरेकज आत्मनि जायमान सामान्यबोधोऽचक्षुर्दर्शनशब्दाभिधेय इति निगलितोऽर्थ । केचित्तु "अचक्खु सेसिंदिय"इतिवचनस्य नियाम कनामन्त्रीकृत्य शेषेन्द्रियज एव सामान्यबोधो दर्शनमित्याख्यान्ति। तथाऽवधिना-रूपोऽवधि विशेषपरिच्छेदेन बोधविशेषेण दर्शन-सामान्यावगमोऽवधिदर्शन, सामान्यमात्रग्राहकत्वाच्च दर्शनाना न ज्ञानानामिव विपर्यय एषाम्। तथा च न मतिश्रुताज्ञानविभङ्गवदत्र दर्शनाना विपर्ययेण निर्देश । तथा च कथ नावधिदर्शनविभङ्ग दर्शन दर्शन नाभिमत ज्ञानवद्विपर्ययेणेति शङ्कोत्पादितैव, एवमे वादर्शनव्यपदेशाशङ्कापि निरस्ता, सामान्ये तावद्विभागाभावात्। यद्वा-श्रद्धानाभावेन ज्ञान एव विपर्ययभावादिति। ननु च यथा अवधिज्ञानापेक्षयाऽवधिदर्शनमभिमत तथा श्रुतज्ञानमन पर्याय ज्ञानापेक्षया कथ न दर्शनद्वयमभिमतमिति चेत सत्य, श्रुतज्ञान हि मनोमात्रविषय मतिपूर्वकं चेति गतार्थं तद्दर्शनमचक्षुर्दर्शनेनेति ।

तथा च श्रुतपश्यत्ताभिधानेऽपि न क्षति । न च क्षति श्रुतज्ञा योपन सर्वद्रव्याणि जानाति पश्यतीत्यादिवचनेऽपि । मन पर्याय तु नास्त्येव सामान्यग्रहणमिति न तद्दर्शनाभिलाप । सामान्यबोधेति नियमे चतद्भिन्नत्वेन सद्भावात् श्रुतान्यथाऽनुपपत्ते ,अतीन्द्रिये चार्थे सद्भा वप्रतिपत्तय नान्यदागमानुमानमस्तीति। पर्यायाणा च द्विनैपन्य त्वात्तदवगमे न दर्शनावाडक्षति निप्पप । न च चाक्षुषमवधिदर्शनन रुपिद्रव्यसामान्योपयोगरुपेण तदवकरणमिति । सति सभयनियमे एवैतत्य वक्तु युक्तत्वात्, स एव तु न विद्यते, विनाप्यन्यमन पर्या योत्पादात विना चावधिविभङ्गावधिदर्शनाभावादिति । तथा केवल-सम्पूर्णविषयगोचर सामान्यग्राहि (दर्शन) केवलदर्शनम्, तच्च भिन्न समये एकस्मिन् वा समये केवलज्ञानस्याभिन्न वा केवलाविति विविधनयापेक्ष विवत सामयाम्बुधावुपयुज्य ज्ञानविन्दूक्तरीत्या सङ्गमनीय क्षायोपशमिकप्रकरणत्वाच्च दर्शनमेवात्र प्रवृत्तम्, केवल तु गणितपूर्व क्षायिके भावे इति। तथा 'दानादिलब्धय इति। दानादीनि च पञ्च व्याख्यातपूर्वाणि क्षायिकप्रकरण । ननु क्षायिके व्याख्यातानि तर्हि कथमत्राप्याम्नायन्त इतिचेद्, द्विवि-धानि हि दानादीनि-समूलघात घातितान्तरायकर्मोत्थानि तत्क्षयो पशमजानि च। आद्यानि पूर्वमुक्तानि, अन्यानि त्वनेव तदधिकार-त्वाद्बोध्यानि। एव च सम्यक्त्वचारित्र अपि त्रिपु व्याख्याय ते (यते) कथमित्यपि समाहित ज्ञेयम्, तयोस्त्रविध्यात्। क्षयोपशमाभावे च दानाद्यन्तरायाणामप्यक्षोपलभ्यमानाना दानादीनामसङ्गत्यापत्ते । न च क्षयोऽय तथा। तथा सति सर्वदा सर्वयोग्योपलम्भप्राप्ते । न चोपशमोऽप्यत्वैपामिति, सर्वथैतद्रहितत्वानुपलम्भात, आजआहारादे सर्वेषा भावात "ओयाहारा सव्वे" इतिवचनात्। सूक्ष्मक्षयोपश मश्च वीर्यान्तरायस्याप्यभ्युपगम्य एव, अनन्यगतिकत्वाज्जीवन

प्रयत्नस्योपशम चावश्यपातभावात्, गत्यन्तरालेऽपि चास्यैव क्षयोपशम, चेतनादिसत्त्वादिति द्विविधानि दानादीनीत्यव सम्यग्। लब्धित्व चोपशमादिक्रिया यतमप्रभवत्वम्, इत्ययमेव च सर्वा लब्धय साकारोपयोगोपयुक्तस्येति सङ्गच्छते, तस्यवोपयोग विशेषणैवत्द्भावात्। उपयोगविनापत्ता च साकारत्व। ननु क्षयमहदादिपदवीनामौदयिकानामपि लब्धित्व जगीयते तर्हीति चेत, क्षयादिहेतुता प्रतीयत नान्यथा। अत एव च लब्धिवर्णना विचारे चक्रधरादिबलवर्णन सङ्गच्छत। ननु कथ तर्हि सत्यामप्य-ष्टाविंशतौ लब्धीना पञ्चवता ? अष्टाविंशतिश्चैव– आमोसहि विप्पोसहि खेलोसही जल्लओसही चेव। सव्वोसही संभिन्ने ओही रिउमिउलमइलद्धी ॥१॥ चारण आसीविस केवली य गणहारिणो य पुव्वधरा। अरहन्त चक्कवट्टी बलदेवा वासुदेवा य ॥२॥ खीर-महुसप्पिआसव–कोट्ठयबुद्धि–पयाणुसारी य। तह बीयबुद्धि तेयग आहारग सीयलेसा य ॥३॥ वउव्विदेहलद्धी अक्खीणमहाणसी पुलाया य। परिणामतववसेणा एमाई हुंति लद्धिओ ॥४॥ 'इति। न च वाच्यमुपलक्षणीभूता इमा तथा सति पञ्चानामप्यग्रहण प्रसङ्गात इति चेत्, सत्य पर सर्वा अपि तपोविनापाद्भवा, तपश्च वीर्यान्तरायक्षयोपशमजम। यत एवोच्यते– विशिष्टमानस-वेगमसारमतस्तप। क्षायोपशमिक नयमव्याबाधसुखारम्भ [अप्टवे]मिति। यस्य परिणामविशेष सहकारितयाऽभिप्रयते सोऽपि चारित्रादिनाऽत्र गृहीत भवति न न्यूनता लब्धिपञ्चकोप न्यासेऽप्यत्र। ननु किं तर्हि गृहीता अवध्याद्या स्पष्टमिति चेद, आत्मा साधारणगुणत्वेन विनापि तपो भावात्वेऽयत्र प्रसङ्गन। चतु स्त्रित्रिपञ्चभेदा' इति तु गताथमेव। एव प्रख्य क्षायोपशमिकान् पञ्चदश भावान् शेषांस्त्रीनाह 'सम्यक्त्वचारित्रमयमासंयमाश्चे'[॥]

ननु कथं पृथगुपन्यासः एषामिति चेद्, एवैकैकेति सङ्ख्याया अनुपन्यासेन लाघवार्थेति। अथ नैवमौदयिक इति चेत्, पर्याप्ते लेश्यो पादानस्य सकारणत्वात्तामा पर्याप्ते उपादाने चावश्यं सङ्ख्याया उपादेयत्वाद्धिति। न च वाच्यं सम्यक्त्वं चारित्रं च 'सम्यक्त्व-चारित्रे' इत्यतस्मादौपशमिकादनुवर्त्तेते एव, न चोपात्ते साक्षात् अत एव क्षायिके, किन्तूपरिष्टादाकृष्टे, तथाऽत्रापि विधेयम्, निर्देशश्च स्पष्टं केवलं संयमासंयम एवेति चेत्, सत्यं, परं परिभाषानभिज्ञतास्यापकमेतत्, यतो न सम्यक्त्वचारित्रे इत्यनुवर्तिते क्षायिकसूत्रे, किन्तु चकारेणानुकृष्टे 'चानुकृष्टं च नोत्तरत्रे'ति हि वैयाकरणानां समयः सुप्रसिद्ध एव। न च वाच्यं नाकर्षणीये तर्हि चकारेण एवमेवानुवर्त्यताम्, तथा सति च नात्र पुनर्निरूप्यमं न च पूर्वसूत्रे चकारः कर्त्तव्य इति चेत्, सत्यं, लाघवमपेक्ष्यार्थस्यैव निर्देशः, आचार्यस्य शैली या दृश्यते—यत्र दीर्घमनुवर्त्तनीयम् उद्देश्यं वा नानुवृत्तिरिति पूर्वं चकारेण पश्चाच्च साक्षान्निर्देश इति। तथा च तत्र तत्रोक्ततच्छन्दसाफल्य मिति। यद्वा—निवृत्तिवाचकता चकारेणानुकर्षणे चकारस्याभिप्रेत्येदं स्पष्टितम्। यद्वा अनुवर्त्तनं संयमासंयमाद् भिन्नत्वं कश्चित्प्रतिपद्येत, कार्यं च स्याद्विनापव्याख्यानं वक्ति नानुवर्त्तितम्। केचित्त्वित एव भिन्नत्वेन त्रयाणां निर्देशः स्वरसादित्याहुः। अवान्तरभेदाभावात् पार्थक्येन प्ररूपणानियमज्ञापनायैव निर्देश इत्यपरे। तत्त्वं (तु) बहुश्रुता एव विदन्ति। अत्र सम्यक्त्वं तत्त्वार्थश्रद्धानलक्षणं, चारित्रं सर्वसावद्यनिवृत्तिरूपं सामायिकादीनामन्यतमम्, संयमासंयमश्च स्थूलेभ्यो हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो ज्ञात्वाऽभ्युपगम्य पारणमितिस्वरूपा विरतिः सूक्ष्मेभ्यश्च तेभ्यो विरतिः, अविरतिश्चैषां परिहर्त्तुमशक्यत्वात् गृहस्थत्वे न तु परिणामाभावात्,

अत एव वधवधादीनामतिचारत्व सङ्गच्छते, भङ्गाभङ्गरूपत्वात्ते षाम्। न च वाच्य देशविरते सूक्ष्मत्वात् कुन्थ्वादिकाय छिद्रमिव न तस्या भङ्गाभङ्गरूपातिचारसम्पत्ति । अयच्च–'सव्व वि य अइयारा सजलणाण उदयओ हुति । मूलच्छेज्ज पुण होइ बारसण्ह कसायाण ॥१॥" इत्यादिवचनात्तया प्रत्याख्यानावरणाद्युदय स्पष्टव देशविरत क्षतिर्निरतिचारतेति। कुन्थ्वादिष्वपि स्वापेक्षया तथाविधच्छिद्रसत्त्वमिव अयथा तयाहाराद्यपरिणतेर्देशविरतेरपि स्युरेवातिचारा । 'सव्वे वि य इत्यादि च सर्वविरत्यपेक्षमिति न तदुदयतो देशविरतिक्षति । व्याख्यायते च कश्चिदेषा गाथव–यथा द्वादशाना कपायाणामुदये मूलच्छेद्यमित्यस्यैव परमार्थो यदुत–यथा सज्वलनास्तीव्रा मन्दा मध्या वाऽतिचारानाऽऽपादयन्ति तथा नान्ये, किन्तु प्रत्याख्यानावरणादये चारित्रस्य हतिरव । एवमप्रत्याख्यानोदय देशविरतेरन तानुबन्ध्युदये च सम्यक्त्वस्यापीति पूवपूवकपायो दय पूर्वपूर्वस्य मूलच्छेदयनति। तथा च कथ नातिचारत्वमस्या, व्यपदिष्टाश्च साक्षादेव सूत्रप्रकरणयोरतिचारा अप्यस्या इत्यलमप्रस्तुतेन। इत्थमेव दिग्विरत्यादावपि क्षपदिगमनानर्थ दण्डसावद्यकरणादिभागोपभोगोपयोगिसक्षिप्तेतरादिभ्यो विरतस्वा- दितरेभ्यश्चाविरतत्वात स्पष्ट एव देशविरताना सयमासयम । तथा च पञ्चदशाना त्रिभिर्मेलन जाता एवाष्टादश। एत च क्षायोपशमिका । चकारश्चात्र मत्यादीनामवग्रहादिभदज्ञापनाय, तेन श्रोत्रेन्द्रियलब्धिरित्याद्यनुयोगद्वारनिर्दिष्टनापरिगणितभेदक्षयो पशमेन न विरोध । तथा च तत्सूत्र से कि त खओवसमनिप्फण्ण २ अणगविहे पण्णत्ते, त जहा–खओवसमिया आभिणिबोहियनाण लद्धी एव सुयओहिमणपज्जवनाण मइअन्नाण सुयअन्नाण विभगनाण- सम्मदसण मिच्छादसण सम्मामिच्छदसण-सामाइयचरित्त च्छेओव

ट्ठावण-परिहारविसुद्धि-सुहुमसंपरायचरित्तलद्धी खओवसमिया चरित्ताचरित्तलद्धी खओवसमिया दाणलाभभोगोवभोगवीरियलद्धी खओवसमिया बाललद्धी पंडियलद्धी खओवसमिया बालपंडियलद्धी खओवसमिया सोइंदियलद्धी जाव फासिंदियलद्धी खओवसमिया आयारधरलद्धी जाव दिट्ठिवायधरे खओवसमिया नवपुव्वधरे जाव चोद्दसपुव्वधरे खओवसमिए गणीवायए, से तं खओवसमनिप्फन्ने' ति । अत्र च सामायिकादिचारित्रभेदा बालपण्डितबालपण्डितत्वानि च केवलमप्यत्र चारित्रदेशविरतिहेतुत्वात् परिणामाः सम्यक्त्वादिविषयभूता इति न पृथगुक्तेभ्य । श्रोत्रेन्द्रियाद्युपलब्धयश्च न मतिज्ञानचक्षुरचक्षुर्दर्शनेभ्यो भिन्ना लब्धीन्द्रियाणां क्षयोपशमस्वरूपत्वात्, तस्य च मत्याद्यावरणक्षयोपशमरूपत्वादुपयोगेन्द्रियाण्यपि मत्यादिरूपाण्येव अत एव च क्षायोपशमिकानीन्द्रियाणि । न च वेद्यमित्यनन्तानीति पठयत पूर्वोक्तयुक्तेस्तस्य मत्याद्यभावात् । द्रव्येन्द्रियाणि त्वौदयिक पर्याप्तनामकर्मोदयत्वाद्, तानि निर्वृत्तीन्द्रियाणि सत्येव यदपक्ष्योच्यते'सौ पञ्चेन्द्रिय इति । आचारधरत्वाद्या गणिवाचकत्वावसाना लब्धयस्तु स्पष्टमेव श्रुतज्ञानान्यजाता इति नाधिका क्षायोपशमिकभेदा । ननु प्रोक्तान्तर्भावेऽपि सामायिकादीनां मिथ्यात्व-सम्यग्मिथ्यात्वयो कथं क्षायोपशमिकत्वम् । कथं वा नाभिहितौ तावत्र भेदौ कुत्र वा अन्तर्भावनीयाविति चेत्, सत्यं, मार्गानुसारिमार्गपतितादिभेदभिन्नं मिथ्यात्वं न मन्दतामन्तरेण तस्य, सा च क्षयोपशमप्रभवेति युक्तं मिथ्यात्वस्यापि तथाविधस्य क्षायोपशमिकता । अत एव च मिथ्यात्वस्य गुणस्थानकतापि सङ्गच्छते । यद्वा-अव्यक्तमिथ्यात्वाद्व्यक्तमिथ्यात्वप्राप्तिरिति क्षयोपशमान्तरा, स च मिथ्यात्वस्यैवेति क्षायोपशमिकता तस्य । यत उच्यते- व्यक्तमिथ्यात्वधीप्राप्तिर्गुणस्थानतयोच्यते" [गुणस्थान

थग्रमारोहे] इति । यदि वा सत्यपि मिथ्यात्वोऽन्यअन तानुव धिना म दत्वमप्यत्वभावो यथाभद्रक वादिनानुमेय । स च न त मूल मिथ्यात्वम दत्वाद्य नरेति याग्यमेवास्य क्षायोपशमिकत्वम, अत एव च मिथ्यादृष्टित्वेऽप्युत्थितानुत्थितादिविकल्प सङ्गच्छत इति। सम्यङ्मिथ्यात्वस्य तु द्विधा गतिस्तद्वता द्विधा गते । केचित प्राप्य सम्यक्त्वा केचिच्च प्राप्यमिथ्यात्वा इति स्पष्टो मिथ्यादयऽपि तरतमभाव । स एव च क्षयोपशमाविनाभावीति क्षायोपशमिकता तस्य । न चात्र ते भिन्न उक्ते सम्यक्त्वमूल्त्वन तयोस्तद्ग्रहणेनव ग्रहणात । तथा च नाधिका क्षायोपशमिका इति । भावचतुष्क मास्थाय क्रमनिर्दिष्ट पञ्चम (भाव) निर्दिदिक्षयाह – परिणामे ति। तद्विनलुगन्तनिर्देशात् पारिणामिक इति। तत्र यद्यपि परिणामश दन 'नाथान्तरगमो यस्मात् सवथव न चासम । परिणाम प्रमासिद्ध इष्टश्च खलु पण्डित ॥१॥ इतिवचनात पूर्वावस्थापरित्यागतो त्तरायस्थापरिणतिरुच्यत । तथापि नात्र स गृह्यते, कि तु पारि भाषिकतया स्वभाव एव । तथा च परिणामेन–स्वभावेन निवृत्त पारिणामिक–स्वाभाविक इत्यर्थो निष्पद्यते । ननु किमिति पारिभाषिक परिणामाय परित्यज्यते इति चेन, नहि जीवत्व भव्यत्वादिक नूतन येन तदर्थपरिग्रह समञ्जसतामापद्येत । स च त्रिधा, यदाहु –"जीवभव्याभव्यत्वादीनि च [तत्त्वार्थ०] इति। तत्र जीवति जीविष्यति अजीवीत इ यौणादिकप्रत्यये जीव तस्य भाव स्वरूपमवच्छेदकधर्मो वेति जीवत्वम् तद्धि स्वाभा विकमेव । यतो न हि पूवमजीवस्य सतो जीवत्व भवति यनादो न स्यात पारिणामिकम्, कि त्वनादिनिधन, जीवस्यानादिनिधन त्वात्, तदपि तस्य वीतरागज मान्धन यायनाकिञ्चिमयत्वादिना सिद्धमेव । तथा भविष्यति सिद्धिपर्यायेणेति भव्य । तद्विपरीत

स्त्वभव्य । अत एव भव्याभव्यसिद्धिक इत्यप्युच्यमान सङ्गच्छत एव। भव्याभव्यत्वशङ्काया एव भव्य वनियामकत्वात नवाभव्यत्व शङ्काया धमप्रवृत्तिविघातकता, प्राप्ताया च सिद्धौ नवाप्यायते भव्याभव्ययोर यतरेण, प्राप्स्यमानत्वाभावात् । प्राप्तत्वाच्चेत् किं न तनीया भद उभयविलक्षण वादस्येति । पूवप्रज्ञापनीयनयेन तस्य भव्यत्ववत्त्वात् द्रव्यभव्यत्व तत्रापि "भूतस्य भाविनो वा" इत्यादिवचनात । नाभव्यो नोअभव्य इति तु प्रथमस्य निषेधन द्वितीयस्यापत्ति ससारिषु द्वयो परस्परपरिहारेणावस्थानाच्छवयन केनचिदिति द्वितीयमपि यपोषि । तथा च तेन न भावा तर व्याख्येयम् । तथा भव्यत्व चापि भव्यत्वविशेष एवेति न तदपि भिन्नम् । तथा च भ य वमभव्यत्व चेति द्वयमेव । 'आदीनी'ति बहुवचना त्तादिशब्दोऽत्र । तत्रादिना जीवस्य सामा यपारिणामिका भावा सूचिता । के ते ? इति चेदाह –अस्तित्व अ यत्व कतृत्व भोक्तृत्व गुणवत्त्वमसर्वगतत्वमनादिकर्मस तानबद्धत्व प्रदेशवत्त्वमरूपत्व नित्यत्वमित्येवमादय । ननु च किमिति सम्यक्त्वादय कण्ठत उक्त्वा अस्तित्वादयश्चादिशब्देन सूचिता ? इति चेत्, सम्यक्त्वादीना धर्मापवत्वात् अस्तित्वादीना च सामा यत्वात् । केन समानतति चेद धर्मादिनाऽजीवेनेति गृहाण । न वस्त्वेषा धर्मादिभि समानत्वमस्तित्वादीना, परं कर्तृत्वमोक्तृत्वानादिकर्मसन्तानबद्धत्वाना कथं तत ? । यतो न हि धर्मादीना तानीति चेद, अपेक्षया तेषामपि तानि । यत स्वपर्यायाद्यपेक्षया कर्तृत्वभोक्तृत्वे कर्मसन्तत्युपग्रहादिना च कर्मस तानबद्धत्वम् अ यथा वा यथागम परिभावनीयानि। बहुवचनेन चादिशब्देनेतरेणाजीव वादय सूचिता । अजीवत्वमपि पारिणामिकमेव । यतो न हि वर्तमानजीवत्वस्य भविष्यदजीवत्वमस्ति, येनाजीवत्व न भवेत स्वाभाविकम् । एव

धर्माधर्माकाशपुद्गलत्वादयोऽपि ग्राह्या । न चनत स्वमनीषिका विजम्भितम् । यन उक्तमेव–'औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वनत्त्वमौदयिकपारिणामिकौ चे' त्यत्र मध्यभागे जीवस्य स्वतत्त्वमनुवर्तद्भिर्भाष्यकाररजीवानामपि प्रात्यभावयुगल्म । एतदपि च न स्वमनीषिकया व्याख्यायते, यत आहु – 'छद्दा जीवसमासा परिणामुदआ अजीवाण ति तथा धम्माधम्मागासा काली त्ति य पारिणामिओ भावो । खंधादेसपएसा अणू य परिणाम उदए य ॥१॥" इति । तत्राजीवाना पारिणामिक भावव्याख्यान सूत्रोसीणमिनि । एतच्च पारिणामिक स्वाभाविक इत्ययमुररीकृत्य नयम् । यदि च पारिभाषिक परिणामस्याथ स्वीक्रियते, तदापि न विराध । कथ अनादीना जीवत्वादीनां परिणामभवत्व ? तस्य सादि वादिति चेत । प्रतिक्षणभा युत्पादव्ययध्रौव्याश्रा तत्वात् क्षण विशिष्टतया भावाद्वा नादीनामपि भवत्यव भवनता। पठयते चात सवव्यक्तिपु नियन क्षण क्षणऽ यत्वमथ च न विशेष । स याश्चित्य पचित्योराकृतिजातिव्यवस्थानात ॥१॥ इत्यादि । भावेऽपि च क्षणे क्षणेऽ या यत्वस्य, नायथा परिणमति ये ते नादिपारिणामिका इति तत्त्वम् । तत एव चोच्यते पूज्यपाद – 'तद्भाव परिणाम । अनादिरादिमांश्चे ति । [तत्त्वार्थ०] अत एव च 'इन्द्रधन्वादि-मानि ति पौदगलिक पारिणामिक सादिपरिणामभावोऽव्याख्या यमान सङ्गच्छते । न चतत स्वकल्पनाशिल्पिनिर्मितम यत सूत्र– "से किं त पारिणामिए भावे ?, पारिणामिए भावे दुविहे पण्णत्ते, त जहा–साइयपारिणामिए य अणाइयपारिणामिए य । से किं त साइयपारिणामिए ?, साइयपारिणामिए अणगविह पन्नत्त, त जहा–जुन्नमुरा जुनगुलो जुन्नघय जुनतदुला चेव । अब्भा य अब्भरुक्खा सञ्झा गंधव्वनगरा य ॥१॥ उक्कावाया दिसादाहा

विज्जू गज्जिया निग्घाया जूवा जक्खा लित्ता धूमिया महिया रउग्घाया चंदोवराया सूरोवराया चंदपरिवेसा सूरपरिवेसा पडिचंदा पडिसूरा इंदधणू उदग मच्छा अमोहा कविहसिया वासा वासहरा गामो नगरो घरा पव्वओ पायाले भवणा निरओ पासाओ रयणप्पमा जाव तमतमा, सोहम्मे जाव ईसीपब्भारा, परमाणुपोग्गले जाव अणंतपएसिए, से त साइयपारिणामिए । से किं त अणाइयपारिणामिए ?, अणाइयपारिणामिए अणेगविहे पन्नत्ते, त जहा--धम्मत्थिकाए जाव अद्धासमए लोए अलोए भव सिद्धिया अभवसिद्धिया । से त अणाइयपारिणामिए 'त्ति । स्पष्ट एव सूत्र तथा तथा परिणाम पुद्गलाना सम्पद्यमान पारिणामिकतयाम्नात । ननु कथं पर्वतपातालनिरयादीना सादिपारिणामिकता प्रतिपादितेति चेत्, न ह्यसङ्ख्येयकालातिक्रमात् परमेकत्र तिष्ठन्ति पुद्गलास्तत्परिणामेन विपर्यये नूतन चाऽऽगते स्पष्ट एव पारिणामिक सादिर्भाव । न च द्रव्यावस्थानमन्तरेण धर्मादीनामिवानादित्व युक्तियुक्त स्यादिति । एव च षष्ठ सान्नि-पातिक इति । तत्र सन्निपाता--द्व्यादिसयोगस्तेन निर्वृत्त सान्निपातिक । तद्भेदाश्च षड्विंशति । कथमिति चेत् औपशमिकाद्यसनीयमङ्कपञ्चकमुपर्यध । १ २ ३ ४ ५ / ५ ४ ३ २ १ तत्र प्रथमपङ्क्तिगाऽधस्त्यपञ्चकाङ्कस्योपरितनेनैकेन भागे हृत पञ्च लभ्यन्ते, ते चैकसयोगा । आगताना पञ्चाना द्वितीयपङ्क्त्यधस्त्यचतुष्केण गुणने जाता विंशति उपरितनेन द्विकेन भागे हृते लब्धा दश, एते च द्विकसयोगा । ते ततोऽप्यधस्तनीयत्रिकेण गुणिता जाता त्रिंशत्, उपरिष्टात् त्रिकेण भग्ने लब्धा दशैव त्रिकसयोगा । तेषा च चतुर्थश्रेण्यधस्त्यवर्तिना द्विकेन गुणने जाता विंशति, उपरितनेन चतुष्केण भागेऽपहृते लब्धा पञ्च चतुष्कयोगा । तेऽप्येककेनाऽधस्त्येन

गुणयित्वोपरितनेन पञ्चकेन भागहारे विहिते लब्ध एव पञ्चक याग । सर्वे च मिलिता भवेदेकत्रिंशत्, पर पञ्चकसयोगा नात्र गह्यन्ते तेषा सान्निपातिकत्वाभावात्, द्व्यादिसयोगस्यैव सान्नि पातिकत्वात । तथा च शेषा षड्विंशति सान्निपातिका । एतेऽपि प्ररूपणामात्रोपयोगिनो न सर्वे सम्भविन । यनि सम्भवन्तीति चेत्, षडेव । प्रस्तुतनियुक्तिप्रामाण्यनव योजना–दशसु द्विक- सयोगेषु क्रमेणौपशमिकादिभिश्चतुर्षु औदयिकस्य लब्धषु, औपश- मिकस्य क्षायिकादिभिस्त्रिभिर्लब्धषु त्रिषु क्षायिकस्य मिश्रपारिणा मिकाभ्या द्वयोर्लब्धयोनवम क्षायिकपारिणामिकयो भङ्ग सम्भवति सिद्धानाम । शेषास्तु नवापि न सम्भवन्ति । यत शेषाणामन्त्यवौदयिकी गति क्षायोपशमिक क्षायिक वा ज्ञानादिक, पारिणामिक च जीवत्वमिति अवश्यतोऽपि भावत्रय, तन्निषेध्या एव ते । तथा त्रिकसयोगेष्वपि दशसु औदयिकौपशमिकयो क्षायिकादिभिर्योगेन त्रिषु व्यतीतेषु औदयिकक्षायिकयोर्मिश्रपारि- णामिकाभ्या द्वयोर्भङ्गयो सम्पन्नयो, पञ्चम औदयिकक्षायिक पारिणामिकलक्षण पञ्चमस्त्रिकसयोग सम्भवति । यत केवलिनो भगवत औदयिकी गति, क्षायिक ज्ञान पारिणामिक च जीवत्व यतोऽस्ति । नास्त्युपशमोऽस्यकादशगुणीयचतुर्थगुणीयत्वात्त य । यद्वा–मोहमत्तावितम्यव तद्भावात् चासौ केवलिनो न चास्ति क्षायोपशमिकोऽप्यस्य च्छाद्मस्थिकज्ञानदर्शनातीतत्वेन, ततो न शेषभङ्गकसम्भव । षष्ठस्तु भङ्गक औदयिकक्षायोपशमिकपारि- णामिकारयस्त्रिकसयोगो नारकादिगतिचतुष्टयेऽपि ज्ञेय । यतश्च- तसृष्वपि गतिष्वौदयिकी गति स्यादेव । भवत्र क्षायोपशमिकानि चेन्द्रियाणि मत्यादीनि च, तथा पारिणामिक जीवत्व सम्भवति । तत शेषाणामसम्भवादष्टौ त्रिकसयोगा प्ररूपणामात्रोपयोगिना,

न तु सम्भवन्ति । चतुष्कसयोगेषु त्वौदयिकौपशमिकक्षायोपशमिक पारिणामिकास्यभावचतुष्टयनिर्वर्तित सर्वास्वपि गतिषु सम्भवति, गत्युपशमसम्यक्त्वेन्द्रियजीवत्वसद्भावात्, भवति च तदवर्तिना प्रथमसम्यक्त्वलाभ । तत्र चौपशमिकमेव सम्यक्त्वम् । तथाद्यि कस्मायिकक्षायोपशमिकपारिणामिकभावाख्यचतुष्टय सर्वास्वपि गतिषु सम्भवति, पूर्वोक्तपञ्चत्रिकयोगभावनया क्षायिकसम्यक्त्व भावलेन तथाभावात् । पञ्चकसयोगस्त्वेक । स च नरकतावेव सम्भवति । यतोऽसावुपशमश्रेणि प्रतिपन्नस्य क्षायिकसम्यग्दृष्टेभ वति, न चकमन्य इति । समुदिता एते–द्विकसयोग एक , त्रिक सयोगौ द्वौ चतुष्कसयोगौ द्वौ, एक एव च पञ्चकसयोग इति सम्भविन षड्व । अत्रापि चैकस्त्रिकसयोगो द्वौ च चतु सयोगौ गतिचतुष्टयेऽपि लभ्यन्ते, ततो द्वादश ते विकल्पन्त । ततश्च पञ्चदशविध सान्निपातिक इत्यपि वक्तु शक्यते । यत उक्त– ओदइयखओवसमिए परिणामिएक्केक्को गइचउक्के वि । खय जोगेण वि चउरो तयभाव उवसमेण वि ॥१॥ उवसमसेढी एक्को केवलिणा विय तहेव सिद्धस्स । अविरुद्धसनिवाइयभेया एमेते पन्नरस ॥२॥ ति । ननु च किमिति सान्निपातिकस्य भावस्य ? यतो न हि तेन भवति को पि गुणविशेष । न च व्याख्यातोऽपि शास्त्रकृद्भिरिति चेत्? सत्य परस्परसमागमदर्शनाययतन्निरूपणम् । तथा च सम्भव्यमनुपयोग स्यात, अत एव चान्यत्र पञ्चक निरूप्यते भावा औपशमिकक्षायिकौ भावावित्यादिना, यद्वा– सयोगविशेषण गुणविशेषदर्शनाय । यथा ज्ञानक्रियाभ्या समवेताभ्या मोक्षात पदमस्तथा ऽव्यमनुष्यभवक्षरणौदयिकभावाभ्याम सर्व- विरतिरित्याद्यपि अवगम्यत सान्निपातिकानां तत्प्ररूपणा । तदेव प्ररूपित भावषटक प्रज्ञायजयत आहु –"छव्विहा भावलोगा

स''ति। तत्र षट औदयिकादयो विधा प्रकारा यस्यामौ षड्विध, नाम्न्य यो भाव एतान्य इत्य यूनता सर्वेषामपि पदार्थानामपु प्रयनतारान्। का''माविरयाह्–भावलाक इति। तत्र भाव इति द्रव्यादिन्यवच्छन्न शुद्धमात्रप्ररूपणानापनाय तया भावभूा ल्वा, विन्गेवनीयत्वात् पदार्थमात्रस्य बाऽऽलोक्यनादन्नर्भावनति भाव-लोया, भावेन वा पर्यायप्राधान्येन भावानुगततया लोका भावलोक। भावा या समुदिता लोका भावलोक। चकारोऽस्यापि द्रव्यादि लोकवद्विषयतापरत्वसूचक ॥७॥

प्रकारान्तरेण भावलोकमेवाह–

तिव्वो रागो अ दोसो य, उइण्णा जस्स जंतुणो।
जाणाहि भावलोगं, अणंतजिणदेसिअं सम्मं ॥८॥

व्याख्या–तत्र तीव्र–उत्कटो मन्दमध्ययोरविवक्षितत्वात्, न पुनरेतावता न तस्य भावलोकता। यद्वा–तीव्रभावस्य लोकयत्वन लोकत्वाभिमधानात्तस्यैव ग्रहणम्। का''माविरयाह्–रागश्चेति, तत्र रज्यत''नात्मरमणनामात्मस्वभाव वा विहाय परेषु पौन्ग लिकेषु स्रक्चन्दनादिष्विति रागा–रागमोहनीय, य मायालोभक पायमोहनीयमिति व्यपदिश्यते "मायालोभकषायाश्चित्यतद्राग सञ्ज्ञित द्वन्द्व [प्रशम॰] मितिवचनात्। रञ्जन या राग प्रीतिलक्षण। चकारस्तत्सहचरितनोकषायनवकस्य तन्निवर्तितप्राण वधादेवा परिग्रहाय। तथा द्विष्यतऽनेन जन्तु कण्टकादिपु दुःख साधनपु इति द्वषो–द्वेषमोहनीयो, यत्क्रोधमानमोहनीयमिति व्यपदिश्यत क्रोधा मानश्च पुनर्द्वेष इति समासनिर्दिष्ट' इति। द्वेषण द्वेषोऽप्रीतिलक्षण। चकारोऽत्रापि पूर्ववत्। अत्र प्राकृतागो पादान तस्य दुरुच्छेद्यत्वप्रतिपादनाय 'भुजसमग्गपवन्नाण मिणहो वज्जसिरला। वीरे जीवतए जाओ गोयमा जं न केवली ॥१॥'

इति वचनात् । द्वेषो वा रागमूलक एवेति ज्ञापनाय, इष्टेषु रक्तो हि जन्तुस्तदपकारिषु द्वेष्टि। एतावेव च परमपदप्राप्तिप्रति बन्धकौ, संसारेऽपि च सुखकल्पवल्लीकृपाणदु खदावदवकाष्ठकल्पौ। यदुक्तं–"को दुक्खं पाविज्जा कस्स व सोक्खेहि विम्हओ होज्जा। को वा न लभिज्ज मुक्खं रागद्दोसा जइ न हुंता ॥१॥" इत्यादि। ननु कथं ज्ञानावरणादीनामुल्लङ्घ्य विहाय मोह एव प्रस्तुत इति चेत्? साम्परायिका हि ज्ञानावरणीयादीनामाश्रयः स च सकषाय स्यैवेत्यत्र व्यपदेशः। तौ किमित्याह – उइण्णे त्ति। उदीर्णौ विहायाऽऽबाधावस्थामुदयावस्थामितौ। ननु किमिति शेषा बन्धाद्या अवस्था उपेक्षिता इति चेत्? उदयाधीनत्वात् बन्धादीनाम् यच्च– विहितऽपि बन्ध यदि विपाक क्षयमपि प्रदेशवेदनसङ्क्रमापवर्तनादिना नोदिते इति स एव गृहीत इति। कस्येत्याह – जस्स जन्तुणो त्ति। यस्य कस्यापि, अनेन सामान्यनिर्देशेन वस्तुमाध्यस्थ्यं ख्यापितं भवति। तथाविधादेव वस्तुतत्त्वाधिगमसम्भवात्। पठ्यते च– "आग्रही बत निनीषति युक्तिं तत्र यत्र मतिरस्य निविष्टा। पक्षपातरहितस्य तु युक्तिर्यत्र तत्र मतिरेति निवेशम् ॥१॥ इति। न हि व्यक्तिविशेषस्यैवापकारको रागद्वेषौ, न्यायेषामिति पक्षपातो माध्यस्थ्यमनावृत्तविदधाति काञ्चन शोभाम्, जैने द्रमत तु निष्पक्ष पातम् आस्तां परेषु पक्षपातवार्ता, यावत् भगवति जिने ऽपि पक्षपातो [नव] शोभायायेति सिद्धान्त [illegible] "न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमा[illegible]
तु, त्वामेव वीर ! प्रभुमा[illegible] [illegible]पि
वक्ष्यत्युक्तं जावस्यूति[illegible]
वाच्यम्, अर्थे[illegible]
प्रत्ययो अवि[illegible]

भाभावे नात्यन्ताभावभानम्, तमसो भानं तु तदधिकरणभानाभावेऽपि आबालगोपालाङ्गनं प्रसिद्धमेव न गृह्यतेऽपवरकावारोऽन्धकारग्रहणेऽपि । न च वाच्यं न तर्हि ज्ञाता तमस स्यादियत्तेति । अभाप्टापत्ते । न हि पयामुक्तपटलज्ञानेऽपि तत्परभागवर्ति नभोमण्डलं गृह्यते केनापि । न च प्रौढालोकाद् बहिर्भागादपवरकान्त प्रवेश पूर्वम् स्वारम्भ पश्चाच्चालोकवत्तया भानमपवरकस्याध्यक्षसिद्धम्, न चैतत्तमसो द्रव्यत्वे युज्यते इति वाच्यम् । यथा ह्यालोकाभिभूतदृष्टेरन्धकारस्यैव स्पष्टवर्णस्य वस्त्रस्य स्पष्टत्वे नाभानेऽपि वस्त्रीयवर्णस्य वस्त्रस्यावर्णत्वेन भानं, क्वचिन्नस्य वा कम्बुन रामलोपप्लुततया पीतिमत्तया भानं च, न तावता दृष्टदृष्टयवलोकिना सत्यत्वं पदार्थस्वरूपं वर्णव्यवस्था वाऽयथाऽङ्गीकर्तुं युज्यते समीक्षावताम्, तथाऽत्रापि समीक्षणीयम् । सर्वं हि ज्ञानं धर्मिण्यभ्रान्तमिति नियमेनात्र वर्णविपर्यासेऽपि धर्मिभ्रान्तत्वानुपपत्ते । महिनावद् दृष्टे प्रतिबन्धकत्वमप्यस्य द्रव्यत्वसाधकमेव । यथा च महिका वायुविदारणं नश्यति द्राक्, तथा तमोऽपि तेजसा । किञ्च यदि तमः स्यादभावरूपं न स्यात्तस्याभिधानादौ नामावली । विद्यते च सा 'ध्वान्तं भूच्छायान्धकारे' इत्यादिना प्रतिपादिता । न चाभावत्वे यथा दृष्टचुपघाते वर्तमानमपि व्यपदिश्यतेऽन्धादिना मातरस्तथैवमपि भविष्यतीति वाच्यम् । तस्यादर्शनादिना स्पष्टमेव तथाद्योतनात् । न चात्र द्योत्यते तथा । न च तत्त्वतो दृष्टयभावमात्रस्याऽन्धत्वेनाभिधानम्, अन्यथा काष्ठादेरपि तथाभिधानापत्तिरुद्भवत्यनिवार्यप्रसरव किन्तु दृष्टिविकारदृष्टियोग्यप्राणिविशेष एव । असुरादिव्यपदेशोऽपि तथैव, न केवलाभावमुख्यत्वेन, किन्तु तद्विशिष्टावस्थावाधकत्वेन । न चात्राप्यालोकाभावलक्षणतमोयुक्तापवरकादिवाधकत्वं तमःशब्देनाभिप्रेयमाणं स्यादुक्ति

पुस्नम तम्य तमोयुक्त गहनतमो गुल्मम इत्याग्व्यिपदेशानाभिधा नानहत्वापानात । न चाभावत्वे तमसा युज्यत दापायास्तमस्वि-न्यादिरभिधानश्रेणि , तका च स्याद्दर्शिता तवनास्पद तमी तमा विभावरी । रजनी वसति श्यामा वासतेयी तमस्विनी' । इत्यादिना दर्शिता चाभिधानगरूपहट्टद्भिराद्वयाल्पिस्तस्या । यच्चोच्यत तम गब्दो द्रव्यवाचको न भवति आलोकशब्दाचत्वे सति आलोक-निरपेक्षचक्षुर्ग्राह्यवाचित्वादालोकाभाववन्दिति । तत्र किं नय यत्नु नयेत-यदालोकगब्दो द्रव्यवाचको न भवति तमगब्दाचत्व सति तमोनिरपेक्षचक्षुर्ग्राह्यवाचित्वात पटाभावादिगव्यदिति । प्रत्यक्षविरोध उभयत्रापि तुल्य । अयच्च-तम पद साभिधय गुद्धायक पम्त्वात्, घटादिपदवन्निति नियममाम्राज्यात् सत्प्रति-पक्षितमिदम् । दृष्टान्ताप्ययुक्त तम गुद्धपदत्वाभावात नियम विरुद्ध चानुमानमिदम् । किन्च एव तत्र शब्दस्यालोका यत्वादिम त्वात् कथ द्रव्यवाचकता । तदथवाचकशब्दा यत्व इति विशेषण पि घटपटादयोऽपि द्रव्यवाचका । न च मनुष्यत्वेन विशेषणीयो हेतुद्रव्यस्यस्मागयमारण तस्यानथकयात । विशेषणेऽपि अञ्जन-सस्कृतचक्षुष्केनावलोक्यन्त एव घटाद्यो विनाऽऽलोकमिति स्पष्ट सिद्धि । तस्यतस्तु नथा तथ्याप्तेर तरेण यादृच्छिकानुमानमात्रेण पञ्चसिद्धि । न चात्र कायकारणभावादिना कयच्चनाप्यस्ति व्याप्तिसिद्धि । एवमारोपितनीलरूप आलोकाभावो यावत्या लोकसद्भाव न तमोव्यवहारस्तावदालोकाभाव आलोकससर्गाभाव-समुदाय एवान्धकार इत्याद्यपि सतामपकणनीयमेव, पूर्वोक्तनी त्यवालोकाभावत्वेनाघटमानत्वात् । एव छायापि नाभावरूपा तमोवत समानसाधनेति च न पयगनुशा तति । विशेषश्चानयो परिणामप्रतिपादकगाथायामेव 'सीया गाइपगामा" इत्यादिना

दर्शित एवेति । किञ्च–यदि च्छाया न स्यात् परमाणुपरिणता, कर्मिति रजस्वगच्छायाया आधकारी परिणामोऽनुभूयते साक्षात्, कथं चादर्शादौ दृश्यते यथाऽऽकार वस्तु । न ह्यभावे स्यादाकृति राकृतेर्भाव एवावस्थाननियमात । न च सा भ्रान्ता, यथापदार्थो पलम्भात, यद्धि पदार्थानुसारि ज्ञान न तदप्रमाणम् । छायाज्ञानमपि शरीराद्यात्त्याद्यनुसारेणोपजायमानच्छायाया एव जायते । अन्य च्च–अभावे वर्णादिर्नाभ्युपगम्यते दृश्यन्ते तु च्छायाया यथाविधि रक्तादयो वर्णा अविगानेन । ननु पराधीनात्मता छाया, न चैव भावं घटपटादौ तथा विरमन्ति चेयं तु व्यपगते विनष्टे वा पदार्थे घटादिके इति चेत । सत्य, विभमभावस्यानुमता भावानुसारिता । न हीदृशोऽभ्युपेतो नियमा–यत सत्येव भावेऽभावो, विनष्टे व्यपगते च नाभाव इति । यदि चोद्योताभावस्य च्छायात्व स्वीक्रियते, स्यात्तदा घतमसावृते पत्रकादौ छाया तस्या भान च । न चैव भवति, किन्तु स्पष्टोद्योते स्पष्टावलोक्यते विलोक्यते दीपादरपि प्रद्योतयन्ती सर्वतश्छायाऽऽदर्शादौ । नतान्तमात्र किन्तु बहिरप्यु द्योतयन्ती दृश्यत एव तेजस्व्यवपतिता छाया स्फटिकादौ । न चाभा सस्य भ्रमस्य वाभ्युपगन्तु युक्तमुद्योतकत्वादि । ननु च कथ तर्हि प्रत्यक्तृभि परिणामदर्शनावसरे "सीया नाइपगासेति" प्रतिपादित छायाया स्वरूपम् यतो दीपादेश्छायाया उद्योतकत्वाद्यनुभवसिद्ध मिति चेत् । सत्य भास्वराभास्वररूपतया द्वेधा पदार्थ, तत्र भास्वरच्छायाया स्पष्ट गम्यमानत्वात प्रतीतत्वेनाप्रतीतमिति वचनात्स्वच्छायाया अनुमानागोचरता विभाव्य तादृशोऽकदाग्रहान प्रति तदच्छायाया साध्यत्वमभिप्रत्येद व्याख्याऽऽव्यपु पूज्य पादा । कदाग्रहाविष्टश्च नोपदेशार्ह इति तु सर्ववादिसम्मतमेव, मध्यस्थस्यैव तदर्हत्वात । छायाया अभावे भ्रान्तत्वे वा कथ च

प्रतिबिम्बग्राहित्वात् काचादेः स्वच्छ मुखादिप्रतिकृति स्यात् । एताव-
ताप्याच्छायायाः , न तदापातालोकादौ प्रत्यवभिभवात् याव
दपानुगुणसन्निधाना स्फटिके तथात्वं, वर्तनात् व्यपगमे वा नास्ति ।
तावता प्रसरस्य भास्वता । तत्र स्वतस्त्यागापत्ता च अयत्र नाग
पत्तेरागाप इति प्रतिबिम्बेऽन्वेषणाय कारण विहाय सदापरप्रति-
पत्ताम् । भवति चालोकाभ्यन्तरावयवत्पुरस्तस्य छाया यथ
नाभावरूपेण तस्या उत्पत्तेस्तु युज्यते ? यथ चाभावत्वे तस्या
नील रूप आगतिम उष्णत्वाभावात्मासौ वास्तव इति चेत्
विमुणत्वाभावेन स्पर्शादि रूपादि वा विद्यते ? । तथा च नील-
रूप एव किमिति स्पर्शायाश्रीयते उष्णत्वाभावरूपेणैव तस्य
एव मति स्वाकारोऽनित्यात । न च वाच्य विनाश तस्या अवयवा
नवयन्ते यदि च स्यात् सा भावरूपा स्पृश्यावयवान्तरया , यताद
वपात्रान्निवर्तेत । सगमन धारणार वपूर्वाद स्पर्शरूपाभिमत गमन
मूर्छन्ति न तस्याऽभ्यन्तरावयवा । न धर्मावता न गुणमदादयः
भावरूपा , उत्पन्नस्य सा कि दृष्टा अवयवा ? यथ च तस्य
स्वाश्रितत भावतनि निश्चित्यमव चास्ति । रूपावत्वे स्पर्शाधि
धानविधुरता तस्या गम्भवन्तीयन्युक्तानां वाय्वादिना च स्वीकृता
भावत्वेन गमानयोगक्षेममित्यलाघमेव । पदार्थस्वभाववैचित्र्यात्
च दूरस्थस्य पटपटादेश्छायाभावसम्भव । न च दूरस्थस्यापि प्रदेशा
रमति निरावधिनीना वा सूक्ष्मान्नाक्कदृष्टानाद्वापतत् प्राप्नुवन्ति
दृष्टानुराया चेति तत्रापि स्वीकृतमुचिता भ्रान्तिमत्ता । अयच्च
एतस्यास्मादमहाघताकारणमनुभूयत यद् दूरदूरस्थदूरतमादिवस्तु
प्रतिबिम्बेन सामायवाचतत्स्यापि सत्येव नमन्वयिनाप दूरादि
स्थितवस्तुप्रतिबिम्बम् न चैतदुक्तमभावत्वे प्रतिबिम्बच्छायायाः ।
एव च छाया स्वयमेव मनुष्यादेरपि परिणामा उपयुज्य

यथागमं क्षुण्णत्वाच्च नाख्याता । यद्वा– भवानुभावव्याख्यानेन जीवपरिणामा एव व्याख्याता इति भावपरिणाम इत्यत्र पुद्गलपरिणाममुखेन परिणामः प्रतिपादितो जीवस्य । तदेव प्रज्ञाप्य पर्यायतारतम्यमष्टमश्लोके भेदं निगमयन्त आहु – तं जाणे'त्यादि। तत्र जानीहीति शिष्याभिमुखीकरणपूर्वकोदितोपयुक्ततासूचनार्थ–अवबुध्यस्व, अनेनावबोधयोग्याय अवबोधयोग्यपदार्थप्ररूपणाया साफल्यं दर्शयन्तो वारणादिव्यवच्छेदयोपदेशवितरणं प्रत्यपादि, अन्यथा हि विराधनाप्रसङ्गजनितभवाटवीपरिभ्रमणप्रसङ्गश्च दुर्वारः । यदाहुः–'यद् भाषितं मुनीन्द्रैः पापं खलु देशना परस्थाने । उमार्गनयनमेतद् भवगहने दारुणविपाकम् ॥१॥' [षोडशके] इत्यादि। किमित्याह–चतुर्विधमिति । चतस्रो विधाः–प्रकाराः, परस्परविभिन्नधर्मोपेताः सन्तोऽपि सामान्यसमानधर्मवन्त्वं हि प्रकारत्वम् । तच्चात्र गुणपर्यायानुभावपरिणामानां पर्यायत्वाव्यतिरेकाद्युक्तत्वम्। क्षेत्रपर्याय इत्यत्र पर्यायशब्दस्य विशिष्टावस्थावाचकता, पर्यायलोक इत्यत्र च पर्यायशब्दस्य धर्मवाचकताऽवसेया । तेन नोभयोरैक्यम् । यद्वा–गुणव्यतिरिक्तधर्मवाचकतया क्षेत्रपर्याय इत्यत्र पर्यायशब्दोऽन्यत्र तु यावद्धर्मवाचकमिति यथार्थता विभागस्य । भवानुभावभावपरिणामयोस्तु प्रथमस्य जीवाजीवोभयजनितया अन्यस्य गुणविकाररूपतया भिन्नत्वाद्धर्मत्वाच्च पर्यायत्वात् पर्यायलोकता न कथञ्चनापि युक्त्यतिरेकिणीति यथार्थैव पर्यायलोकस्य चतुष्प्रकारता, अवान्तरभेदस्यैव प्रकारार्थत्वात् । कं चतुर्विधतया विद्याद् ? इत्याहु –'एत'मिति । एतं पूर्वमानन्तर्येण व्याख्यातत्वात् निर्दिष्टमेतदा भिन्नवाक्याभावाद् यादेशत्व न, तेन नन्विति । अत्र पूर्वोत्तरार्द्धयोरखण्डवाक्यस्य वा अनुवृत्तौ न भेदो न चाभेद इति सूचनम् । भेदेऽभेदे वा समीपतरत्ववाचिनैतदा निर्देशयोगात्,

क्यञ्चिद्भेदाभद एव तद्योगात। एतस्य चतुर्विधस्यापि का आख्या? इत्याह – पज्जवलोग ' इति। तत्र परि मवताभावन अवन पर्यायः परिसाम्न पर्यायापक्षयोत्पादव्ययमद्रुावेन द्रव्यस्य रमणात्। यत उच्यत– उप्पायटठिइभगाइ हदि दवियलक्खण एय इति। यद्वा– अतीतादिपर्यायप्रमाणत्वात् द्रव्यस्य पययमा पययवाणाम। यदाहु 'एगदविअम्मि ज अयपज्जया वयणपज्जया या वि। तीयाणा गयभूया तावइय त हवइ दव्व ॥१॥' इति। अत्राद्ययोरर्थपर्यायत्वमन्त्ययोर्व्यञ्जनपर्यायत्व चेति विवरः स्वयमूह्यः। पययन वा परावर्तन वा समादया पययः पयाया वा द्रव्यस्यावस्थितत्वात पययन पर्यायाणामेव 'उप्पज्जति वयति अ भावा नियमेण पज्ज वनयस्स ' इतिवचनात। त एव ममुदिता जीवमानत्वाल्लोक पययलोक पययलाक पर्यायलोको वा पययवाणामानन्त्यात। "जीवा पोग्गलममया दव्वपएसा य पज्जवा चव। थावा णता णता विसेस अहिया दुवे णता ॥१॥ इति वचनात। कथमेव निर्देश? इत्याह – समासण 'ति। सम्यग्विरोधाभावरूपतयासन–स्थापन सम्यगविरोधन यासन–वस्तूना पयायलक्षणानां निक्षपण समास। समसन वा परस्पराबाधाभावेनैकीकरणम्। न हि गुन्दध्नोरिवकी करणे स्वरूपपरावर्त्ति पयायाणामुक्त्यनि समास तन। हेतौ, चतुर्विधपयायलोकमानापक्षया करण वा ततीया। नव व्यपदश मन्तरेण भवति पययलोकमानमिति तृतीयया करणाव्यायिन्या व्यपदेश ॥९॥

तदेव पयवलोकव्याख्यानाद्यपि व्याख्यातो व्याचिख्या सितोऽष्टविधोऽपि लोको "णाम ठवणा इत्यादिना प्रक्रान्त, पर पययलोकस्य विशेषतस्तदवान्तरभेदयोर्द्रव्यगुणभावपरिणामयोश्च दुर्ज्ञेयत्वादवगमसौकर्याय विशेषव्याख्यानाय द्वात्रपर्यायभवानुभा

वयोभावपरिणामनामनुन्याय द्विविधतया वा पर्यायलोकताम्या नाय याऽऽह –

वण्ण रस गध सठाण फासठाणगइवण्णभए अ ।

परिणामे अ बहुविहे पज्जवलोग वियाणाहि ॥१०॥

व्याख्या–अत्रावधय तावदिदम्–जीवस्य द्रव्यत्वेन भावत्वेन च तदगुणाना तत्पर्यायाणा चा ख्याल नापभणीयतामर्हति, तथापि भावलोकस्य जीवगुणप्राधान्येन भवलोकस्य च जीवपर्याय प्राधान्येन व्याख्यानात पर्यायाणा च परिणामत्वात नापोल्लेख जीवगुणपर्यायाणा विशदीऽनव न । यद्यपि च धर्मादिजीवस्यापि सता न प्राक् न चात्रापि उल्लेखो बन्धन विहितस्तथापि नानान्याख्या निरचनीया धर्मादिवशश्रय विशेषत आगमगेयत्वात । सामान्यतस्तु जीवमजीवे रूवमरूवि ' इत्यत्र दव्वगुण ' इत्यत्र च विवक्षस्वरूपत्वात पुद्गलास्तिकायस्य स्वजीवत्वादिना समान स्यापि सुप्रज्ञाप्यत्वाद्विशेषण व्याख्या विधीयत इति । तत्र वण्यते– निरूप्यते भायते वा स्पष्टयाऽर्थोऽनेनेति वर्ण शुक्लादिभेदेन पञ्चधा । न च नाच्य कथ पञ्चधेति कपिशादिभावादिति । अलमे हि सयोगजा वर्णा यानुवर्तन्त परिणामव्याख्यान । अत्र तु मूलभे दव्याख्यानमेव । ननु परिणामव्याख्यानेऽपि व्याख्याना एकत्रिशदेव भङ्गा वणाना मूलभेद सह विधानानि च बहूयव वर्णाना न च तानि तत्रात्र वा व्याख्यातानि वणतारतम्यतादर्शनाच्चैकजातीयेऽपि वर्णे ततत स्वबुद्ध्यदर्गीणमिति चेत । सत्य विभागा हि सामान्य- विशेषरूपेणाभिप्रयत । तत्र वर्णत्वेन विभागाभाव वेवत्वेन विभा गविस्तारव्याख्यान चक्षुगुणादानतगुण तारतम्यभावान्नव शक्य निरूपयितुम्, न च सुज्ञममपि च्छद्मस्थैरिति सामान्यविशेषरूपेण पञ्चप्रकारत्वरूपेण मूलभेदभूतेन व्याख्यान, सयोगजास्तु प्रत्यश

गम्या परिणामजाश्चेत्ति परिणामव्याख्यानावसरे व्याख्याता इति न वाच्यमर्हति । तथा न कपिशादिवर्यदि सयोगजा वर्णा परिगणनीयास्तर्हि न केवलमेते मन्ये किन्त्वेकत्रिंशदप व्याख्येया । अयच्च-कपिशस्य सयोगजत्व यथा पृथक् स्थान तथाऽन्यषामपि किमिति धूसरादिवर्णाना नाख्यान ? चित्रनयाभिमान च तेषा किं न कपिशस्यापि, अवयवाना भिन्नभिन्नवर्णतानुकत्वादिति चेत् न तर्हि अवयवाना भिन्नवर्णत्वे केवलमोपचारिकमवावयविनस्त द्वर्णत्वम् । न हि प्रत्यवयव कपिशत्वादि विद्यत । यथा हि द्वित्वादि अपेक्षाबुद्धिजनित, तथा कपिशत्वादि । ननु न भन्नाख्यान पायवयन भवति युक्तियुक्तम् । चित्रत्व च मामान्यरूपेण परिगण्यमानमपि न मूलभेदतामर्हति सयोगजत्वात । नन परिणामव्याख्यान किं तर्हि मूलभेदा अपि परिगणिता? यतो न ते सयोगजा इति चेत । सत्य परमन्यवर्णपुद्गलानामन्यवर्णत्वेन परिणतिमद्भावास्तेषा मूलभेदाना पारिणामिकभङ्गवदाख्यानम् । यद्वा-तीव्रम दशावस्थत्वद्वर्णस मायोग पि सर्वत्र विद्यत एवेति तथा पारिणामिकतयाख्यानम् । वर्णसमायोगेन भवत्येव तथापरिणामो प्रत्यक्षपरिगणितवर्णरूपा इति तेषा तथाख्यानम् । ननु च कथ तर्हि मूलभेदा कथ वा कापोतादय उत्तरभेदा ? इति चेत् न लभ्यन्तेऽत्र समुदिता वर्णा क्वचिदपि कापोतादिषु तु य ये सयुज्य त ते त नायन्तेऽवयवविभागे सूक्ष्मनिभाल्न वा तत्तच्छाययति तेषा पृथग्वर्णत्व वर्णित शास्त्रकृद्भि कृष्णादीनाम न तु कपिशादीनामिति नय सूक्ष्मधिया सूक्ष्मधीभिर्ययागम विभाव्य । यद्वा-पञ्चापि वर्णा सन्त्येव प्रतिस्कन्ध, पर यदापष्टम्भक यथाप्नोति तदा तथा परिणमतीति । दृश्यते कृष्णाद सयोगजत्वमपि क्वचित्, पर नतावता मूलभेदविलोपापत्ति । अयमेव न्यायो [illegible]

पानीयस्य भिन्नकायचेऽनरा ान्य, यतस्तत्रापि वियत एव वायुकायतया परिणतानां पुद्गलानां तथास्वभावतापरिणतो वा वायुरभयमीरननोदकतया नाभयज्ञानयोऽवयवत्वे तु तथत्रापरूप स्पस्पर्शवत उपलम्भ सवथा नवे द्रियव्यापार, यथा न वाऽवय यज्ञार विनाऽवयविज्ञान, स्पष्टाश्चेदवयवा न च वायुद्वयस्य स्पष्ट ताऽप्सु, किन्तु तदवरूपतया परिणत वायुद्वन्द्व तथा स्पष्टमेव पाथय अयथा वापोनादीनामवयवोल्लेखा भवेन। न च वाच्यम्, तथापावयवेऽपि जीवनिकायत्वेन कथ पाथयमिति। यथा हि नराणा शरीर कृम्यादिभि स्वशरीरतया परिणाम्यते, परिणमति च सदव पुनर्धा यम्पापत्त्या मानुषशरीररूपतयव विध्वस्य वायुरुपगच्छ न्ति उत्पद्यन्त चाप्कायिका अप्यत्रनि विवचनीय विवेकि वर्णित परिणामसत्प्रकृतिवच्च। रसास्ष्वपि नयम्। रस्यन्त—आस्वाद्यन्त इति रसास्तिक्ताद्य पञ्चधा। ननु च कथ पञ्चव रसा, षष्ठस्य लवणस्यापि भावात अम्ललवणयोरेव स्पष्टव वैविध्ये भिदेति चत। सत्य वैविध्यत। पठ्यते चात एव स्थानान्तरे— 'तित्ते वा कडुए वा कसाए वा अंबिले वा महुरे वा लवण वा' इति। अत्र तु रसआ परिणया ज उ पवरा ते उ वित्तिया। तित्त—कडुय कसाया अंबिला महुरा तहा ॥१॥ इत्यादावपि तस्य संयोग-जत्वाभिप्रायेण न पृथक् परिगणना, दृश्यते चौदनादौ मात्रया क्षिप्त लवण केवलमाधुर्यपोषकम्। न हि तथानुभूयते क्षारक्षाल क्षाऽपि। न चात्पत्वादभिभूत स रस इति वाच्यम्, तथा सति माधुर्यविशेषोपलम्भायोगात। संयोगत्वेऽपि कपित्थादिवत् कापोता दिवद्वा। अवयवोल्लेखाभावस्तु क्षयापरिणते, तथा चेऽपि पृथग गणन तु मधुरादिपोषकत्वाभावप्रसङ्गात। अम्लादयोऽपि क्षारा नुगृहीता एव स्वस्वभाव यायातथ्यन दर्शयन्ति। तथा च परिणा

मध्य रस पारिणामिकोऽपि चेति न तस्य पाचकम् । लवणा म्लरसवल्लक्षण पठ्यते पुराणे – 'यल्लवण स्यन्दयत्यास्य कपोल गलदाहकृत्' इति । एतच्च मधुरादीना सम्भावनामात्रमिति । क्षिप्त्वाम्लफलानामेव रससमुदायो भवत्येव क्षार इत्यस्य परिणामिना स्पष्टव लवणस्यति । रसपञ्चक लक्षणानि यथा–

'तिक्तो विशदयत्यास्य रसन प्रतिहन्ति च । उद्वेजयति जिह्वाग्र कुर्वश्चिमिचिमा कटु ॥ स्रावयत्यग्निवाक्षास्य कपाली दहतीव च । कषाया जडयेज्जिह्वा कण्ठस्रोतोविबन्धकृत् ॥ अम्ल गाल्यते मुख हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचन । तथा विद्याद्रस स्वादु या वक्त्रमनुलिम्पति । आस्वाद्यमानो देहस्य ह्लादनो ऽत्यप्रमादन । प्रिय पिपीलिकादीनाम्' इति । क्रमानुपूर्व्या व्याख्यानमेषा पारम्पर्यमानुगत्येन । विपरीतक्रमेण तु मधुराम्ल-लवण तिक्त कटु कषाया इत्येवानुक्रम । आध्यमर्वस्य र्याचनुभुमुभि यद्व्यवह्रियते गुण्ड्यादि तिक्त, कटु व निम्बादि, पर गणाद्यनुसारेण पारम्पर्य पक्षक चास्यत गुण्ड्यादीना कटुना, तिक्तता च निम्बादीनाम । स्पष्टीमविप्यति चास्मिन्तन्त्र लक्षण-द्वयाक्ता तगततावयाभ्या क्रमेण "रसन प्रतिहन्ति कुर्वश्चिमिचिमा" मिति लक्षणाभ्याम् । कर्माण्यप्येवविधा रसानाम, व्याख्यायन्त चात्र एव सर्वेषा कर्माणि, तद्यथा–

मधुरो रस – आजन्मसात्म्यात्कुरुते धातूना प्रबल बलम् । बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥१॥ प्रशस्तो बृंहण कण्ठ्य स्तन्यसन्धानकृद् गुरु । आयुष्यो जीवन स्निग्ध पित्तानिलविषापह ॥२॥ कुरुतेऽत्युपयोगेन स मेदकफजान् गदान् । स्थौल्याग्निसादसंन्यासमेहगण्डार्बुदादिकान् ॥३॥ अम्लोऽग्निदीप्तिकृत् स्निग्धो हृद्य पाचनरोचन । उष्णवीर्यो हिमस्पर्श प्रीणनो क्लेदनो

॥४॥ करोति कफपित्तासृग्मूढवातानुलोमनम् । सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम् ॥५॥ कण्डूपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान् । तिक्तः स्वयमरोचिष्णुररुचिं कृमितृड्विषम् ॥६॥ कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत् । क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः ॥७॥ लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः । धातुक्षयानिलव्याधीनतियोगात् करोति सः ॥८॥ कटुर्गलामयोदर्दकुष्ठालसकशोफजित् । व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः ॥९॥ दीपनः पाचनो रुच्यः शोधनोऽन्नस्य शोषणः । छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥१०॥ कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम् । मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम् ॥११॥ कषायः पित्तकफहा गुरुरस्रविशोधनः । पीडनो रोपणः शीतः क्लेदमेदोविशोषणः ॥१२॥ आमसंस्तम्भनो ग्राही रूक्षोऽति त्वक्प्रसादनः । करोति शीलितः सोऽतिविष्टम्भाध्मानहृद्रुजः ॥१३॥ तृट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान् ।" इति । लवणस्याप्यभिहितं कर्म तदप्यायातमनन्तररसानामशेषकर्माधर्येण तस्य संयोगजत्वं प्रतिभायात्—'लवणः स्तम्भसंघातबन्धविध्मापनोऽग्निकृत् । स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत् ॥१॥ सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम् । तृट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम् ॥२॥' इति । तिक्तकटुगुणो च स्पष्टतया प्रत्याययत्येव क्रमेण निम्बशुण्ठ्यादीनां, यत उच्यते—

तिक्तः पटोलीत्रायन्तीवालकोशीरचन्दनम् । भूनिम्बनिम्बकटुकातगरागुरुवत्सकम् ॥१॥ नक्तमालद्विरजनीमुस्तमूर्वाटरूषकम् । पाठापामार्गकांस्यायो गुडूचीधन्वयासकम् ॥२॥ पञ्चमूलं महद्व्याघ्र्यौ विशालातिविषा वचा' । तथा—'कटुको हिङ्गुमरिचक्रिमिजित् पञ्चकोलकम्' इति च । नाथ धाया लक्षितोऽपि रसत्रिपर्यय

मवतः विप्रतिपत्ति । नन्वत निम्नादिरूपस्पर्शव, व्यवहारा नानिमाश्रित्य तु षटक रसाना तथाये भङ्गा परिणाम गन्धत्रि गन, द्वितीयस्मिस्तु त्रिषष्टि, यत उच्यते–

पट पञ्चका षट च पयरसा न्युस्वतुद्धिकौ पञ्चदशप्रकारी। सर्गस्त्रिशा विंशतिरेकमेव द्रव्य षडास्वार्ग्मिनि त्रिषष्टि ॥१॥' अवयवमदे तु प्रत्येकमपरिमिता भदा इति वणवदेव विभावनीयमिति न पुनवचनीयम। सान्निपातिकमासन्निपातिकभेद त्रियमाणपि भवेदेव विनावसङ्ख्या पुर पुर इति स्मरणाथ चात्रालेख । तथा गन्धयते इति गन्धा 'वस्ति गंधिय वन्न' इतिपाठात। म च सुरभीतरभेदेन द्विधव। सयोगजस्तु केवल एक एव द्वयास्तथाभावादेव, पर साम्यम्यकृता अनक भवपर्यन्त अविरुद्धादन्व परिणामाख्यान । तथा 'सठाण ति। तत्र सन्निष्ठ यननति सस्थान परिमण्डलादि पञ्चधा। यताह–

सठाणपरिणया जे उ पचहा ते वियाणिया। परिमडला य वट्टा य तसा चउरंस आयय ॥१॥ ति। नन संस्थानानि भूयस्यन्यत्र षट समचतुरस्रादीनि, यदुच्यते–'समचतुरंस निग्गोह साई खुज्जाइ वामण हुड ।' ति। कथमत्र पञ्चाख्यातानि पनि चेत्। सत्यम्, पर तानि शरीराण्याश्रित्य लक्षणशास्त्रनिर्दिष्टत्वन भिद्यन्त जन्तो कर्मोदयानुसारेण। इमानि तु पुद्गलेषु प्रयोग विस्रसोभयोद्भवानि पञ्चधवेति नानयाविरोध । पञ्चक चत दाकृतिमात्रमभिप्रत्याक्तम परिमाणन त्वमिता तत्र भदा एषाम्। आकृत्यापि चवा घनप्रतरौजोयुग्मकृता भदा पञ्चत एव यत भवत्स्पष्टाद भदा सस्थानानाम। यताह–

परिमडल य वट्ट तसे चउरंस आयए चव। घणपयर पञ्मवज्ज ओय पएसे य जुम्मे य ॥१॥"[उत्तरा० नि०] त्ति

अत्र परिमण्डलस्यातो रिक्तत्वनियमाद घनप्रतरभेदतया निपध आम्यायि । यद्यपि कश्चिदाग्रायने यद्वत्तमेव सम्थान मूलप्रदृ या तस्यव तथा नया मयोग तया तया मयाग इति, पर ननदनिचारु, न्यस्रचतुरस्रादौ कोणाभावप्रसङ्गात । न चाकृतिशास्त्र विद्द नामिवास्ति परमाणूनामाकृतियक्षपक्षया नत्तस्यव मूलसस्थानस्य स्यात इत्यल प्रसङ्गन । आद्यस्य द्विभेदत्वाच्छपाणा च चतुर्णां चतुश्चतुर्भेदवत्त्वादष्टादश भदा सस्थानस्य मौलिका, यत आहु –

पचय वारमय खलु सत्तय वत्तीसय च वट्टम्मि । तिय छक्क य पणतीसा चउरो य हवति तसम्मि ॥१॥ नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरसे । तिग दुग पन्नरसेव य छच्चेव य आयए हुति ॥२॥ पनरस पणयाल वारस छक्कया आययम्मि सठाणे । परिमडलम्मि वीसा चत्ता य भवे पएसाण ॥३॥ इति ।

गमनिका च सौकर्यायय विनय–तावन्ति घनत्वमसत्ता भूत सवत सम च, प्रतरत्वमन्ता भत पर न सर्वतस्तथा, आजस्त्व विगम-प्रदेशश्रेणिक, युग्मत्व च प्रदेशयुगलश्रेणिक, जघन्यपदे चैनत्सङ्ख्य-कप्रदेशरेयोद्भवन्ति सस्थानानि । तत्र परिमण्डलस्यौजमादि-विभागाभावात्तदुल्लङ्घ्य वत्तादिक्रमण प्रतिपादनम् । तत्र प्रथम द्वचतुषु प्रदेशषु स्थापितषु मध्ये चैकस्मिन् स्थापिते तस्मिन् भवति वृत्त प्रतरौजआख्यम् । स्थापना .·˙ । प्रतरयुग्माख्ये च वर्तुलाकारेण प्रथम युगल पश्चाद्द्विश्चत्वार पश्चादष्टौ चेति द्वादश प्रदेशिय वृत्त भवति । जघन्यत इति तु सर्वत्रावधार्य मेवानुक्तमपि, स्थापना । घनौजावृत्त च चतुषु प्रदेशेषु सर्वत एकस्मिश्च पूर्ववत्स्थापिते तस्यकस्योपर्यधश्चकका न्यस्य प्रदश । तथा च सप्तप्रदेशमान तद्भवति । स्थापना ·⁝· । घनयुग्मवर्त्ते च द्वात्रिंशत्प्रदेशात्मना, त चव पूर्वोक्तप्रतरयुग्मस्थापनाया मध्यभागवृ

तिप्रदेशे चतुष्क प्रत्येक चत्वारश्चत्वारो यस्या प्रदेशा । शेषं स्पष्टस्वरूप । तथा च सर्वे द्वात्रिंशद । स्थापना च

इति वृत्तचतुष्कम् । त्र्यस्रचतुष्क यत्र–प्रतरौजस्त्र्यस्र त्रिभि प्रदेशस्त्र्यस्रतया स्थापितस्त्रिभिर्निष्पद्यते । स्थापना । प्रतरयुग्मत्र्यस्र च षट् प्रदेशा पूर्वोक्तस्थापनाया पुरत प्रदेशत्रिक स्थापने तथा ऽङ्गुनिमावात् । स्थापना । घनौजस्त्र्यस्र तु प्रदेशाना पञ्चत्रिंशता । तच्चैव–प्रथमपङ्क्त्या प्रदेशपञ्चक न्यस्यमवशा, द्वितीयस्या तु द्विश्चत्वार, तृतीयस्या त्रिन्त्रय, चतुर्थ्या तु चतु इत्वो द्वौ द्वौ पञ्चम्या तु पञ्चदश एकक । सर्वे घन पञ्चत्रिंशदेव । स्थापना चैव । घनयुग्मत्र्यस्र तु चत्वार एव प्रदेशा, पूर्वोक्तप्रतरौजस्त्र्यस्रप्रथमपङ्क्तिकप्रदेशोपरि द्वितीयविन्यासे तावतामेव भावादाकृतिरपि च जायते त्र्यस्रता । स्थापना । इति त्र्यस्रचतुष्कम् । अथ चतुरस्रचतुष्क, तत्र प्रतरौजश्चतुरस्रे नवप्रदेशा । कथमिति चेत्? प्रथमपङ्क्तौ क्रमेण त्रय एवमन्यदथा द्वितीयपङ्क्त्या तथा तृतीयस्यामपि च, तथा च नवैव प्रदेशा । स्थापना च । प्रतरयुग्मचतुरस्र चत्वार प्रदेशा प्रथमद्वितीयपङ्क्त्याम्नयाकारेण द्वौ द्वौ न्यासात् । स्थापना । घनौजश्चतुरस्र तु प्रदेशाना सप्तविंशत्या कथमिति चेत् पूर्वोक्तप्रतरौजश्चतुरस्रे उपर्युपरि नवकद्वय तावता तथा ऽङ्गस्या च भावात् स्थापना घनयुग्मचतुरस्रे, तु प्रदेशाष्टकमेव कथ पूर्वोक्तप्रतरयुग्मचतुरस्रस्योपरि तथैव तावता न्यासात् स्थापना चैव एव चतुरस्रचतुष्क व्याख्यातमाय तत्र प्रतरौजआयत प्रदेशपञ्चदशकनिष्पन्न कथमिति चेत् त्रिष्वपि पङ्क्तिषु पञ्चपञ्चप्रदेशा स्थाप्या स्थापना

रमायतेतु पडेव त्रयाणा त्रयाणा श्रेणिद्वये स्थापनात स्थापना • • घनौजआयत पञ्चचत्वारिंशत् प्रदशाः। कथमिति चत् प्रथमद्वितीयतृतीयासु पङ्क्तिषु प्रतरीत्त्या न्यस्तासु उपयधस्व कर प्रदेश प्रतिप्रदेश यस्यत जायते पञ्चचत्वारिंशत। घनौज आयत च सस्थान, भवति च पञ्चदश त्रिगुणिता पञ्चचत्वारिंशत्। स्थापना ⁝⁝⁝⁝⁝⁝। घनयुग्मायते तु द्वादश प्रतरयुग्मायत-स्योपरि प्रतिप्रदेशमेकैकप्रदेशस्थापनया द्विगुणितानां षण्णां द्वादश भावात्। स्थापना ⁝⁝⁝। एवमायतचतुष्कम्। परिमण्डल तु सस्थान न सम्भवति चतुर्धा किन्तु घनप्रतरभेदेन द्विधव, प्रतिपादित च प्रागेतत। तत्र प्रतरपरिमण्डले विंशति प्रदेशा। कथ? चतसृषु दिक्षु प्रत्यक श्रेण्या प्रदेशचतुष्क स्थाप्यम्। अन्तराऽन्तरा चक्क प्रदेशास्तथा च विंशतिरेव प्रदेशानाम्। स्थापना च । तथा घनपरिमण्डल तु चत्वारिंशत्प्रदेशानाम्, विंशतेरुपरि पूर्वोक्तानामेकैकप्रदेशस्थापनात् द्व विंशती च चत्वारिंशत् स्थापना ।

अत्रेदमवधेयम्—यत्प्रतरौजोवृत्त प्रदेशपञ्चक तत्र यदि नाभस्य स्यात् स्यात् परिमण्डलता,पूर्वादिदिक्के चापनीत तु घनयुग्मत्र्यस्रता स्यादिति युक्तमेव जघन्यत प्रदेशपञ्चकनिष्पन्नमेवेति। प्रतर युग्मवृत्ते च द्वादशप्रदेशात्मके यद्यपनीयन्त विषमसङ्ख्याका प्रदेशा, स्यादोजस्ता प्रदेशाना, सस्थानस्य चाऽव्यततादि प्रतिदिश द्विद्विप्रदेशाभाव च मध्यस्वस्य प्रदेशचतुष्कमेव योग्यम् यथा शुपिरभावात्। घनौजोवृत्त तु प्रदेशद्वयवृद्धि विना घनत्वस्य सवृत्तत्वस्य निर्वाहिरेव न स्यादिति सप्तप्रदेशता। घनयुग्मवृत्ते च या द्वात्रिंशत प्रदेशाना, तत्र तत्त्व—युग्मत्वादेव प्रतिदिश स्थाप्यौ द्वौ द्वौ प्रदेशौ। तथा च स्थापने च सुतरा मध्य प्रदेशचतुष्क स्थापनस्यावश्यकता, अन्यथा शुपिरतासस्थानभेदयो प्रसङ्गात्।

एव प्रतरौजस्यस्य त्रिप्रदेशनिष्पन्नत्व, युग्म च षड्व प्रदेशास्तस्मिन् युग्मवाच्य । घनौजस्यसे पञ्चत्रिंशत् कथमायता जघन्य ? न्यूनसङ्ख्याया भावास्तेति चेच्छृणु, यतस्य विषमस्य स्वस्वरूपतीति प्रीत्यत्र समानेयानि । तत्र प्रदर्शितस्य प्रत्यापदवन ओजा युग्मप्रतरता द्वादशभिस्त्रिद्वियुग्मरुपभिरभ्यासीभूतनौजस्य । तथा च द्वियुग्मवक्रलक्षणत प्रदेशचतुष्टयेनापि न तथा चतुर्द्विनिवनिव चतुरस्त्रप्रदेशैरपि विषमता नापि अत एव स्वाकारादधा घनताहानि । तदस्वाभावात् चतुस्तथाप्यायत पञ्चद्विचतुष्क त्रिविकचतुर्द्विपञ्चैवलक्षण पञ्चत्रिंशतव प्रदेशघनौजस्यस्य निष्पत्ति, सुवणन्धिवचनस्योपकरणमम चनन् । घनयुग्मस्यस्य तु चतुर्णामव सद्भावाद् अन्यथा प्रतरस्यौजस्य च भावात् । तथा चतुरस्य प्रतरौजीय नवप्रदेशानुव यत एव तन ऊर्ध्व वा निष्पन्न वा चतुरस्त्र च यद्यपि सर्वापि नौजस्त्व समसङ्ख्यावत्त्वात् प्रत्यग्रं त्रिभिस्त्रिभिरेव तन्निष्पाद्य चतुरस्यमस्थानम् । तथा च पर्शिन्स्य अङ्गुलिव च धायें त्रिव त्रिगुणित च नवयति । प्रतरयुग्मचतुरस्र तु युग्मसङ्ख्याया अविरोधात पूर्वपरित्यक्तचतुरैकघन प्रदेशचतुष्क गृह्यते जघन्यत्वादतस्य । घनौजस्यचतुरस्य तु घनोऽस्य चतुर्द्वित्वेन च यद्यपि चतुर्भिरस्त्रभिरत्र निष्पद्यते परमुभयत्र युग्मता, प्रतरस्यापि चाद्य इति तादृश त्रिभिस्त्रिभि प्रतिपदर्शित त्रित्रिकभावात् पड्विंशतिरेव सप्तविंशति प्रदेशा । युग्मघनचतुरस्य तु समसङ्ख्याया प्रथमघनतो पूर्व परित्यक्तचतुर्द्विलक्षणप्रदेशाष्टक परिग्राह्यमेव तु विषमतायादचतुरस्रताया वा व्याघातापत्त । प्रत्येकमास तु प्रदेश पञ्चाम्बर यथ न न्यून प्रत्यावृत्ति वा । तथाच न्यायाग स्वद्विप्रवक्ष्यात पृथुत्वा व्यवहियत इति

स्यसस्थानत्वाच्च पृथुत्तयेव व्यपदेष्टु शक्य इति एवकप्रदेश निष्पन्नकपङ्क्तिगप्रदेशत्रयलक्षणमायतं न गृह्यते। द्वितीयपङ्क्ते स्तथारूपाया न्यासे तु प्रदेशाना न स्यादोजस्ता, विषमकरणे तु प्रतरतापि व्यवच्छिद्यत एव यावच्च प्रतिपङ्क्ति पञ्चपञ्चकरूपा स्तिसषु पङ्क्तिषु [न] गृह्यन्ते तावन्नौजस्ता प्रतरता चाऽव्यततता यता।धिगम्यते। पञ्च च त्रिगुणिता पञ्चदशैव। युग्मे तु पूर्व परियक्त प्रदेशषटनिष्पन्नमायत ग्राह्य, समताया अव्याघातत स्यात्। घनौजायते तु पञ्चदशानि प्रतरायत निष्पन्नमिति यतत एव हृदि। अथ यदि त्रिगद गृह्यते प्रदेशा, स्याद्युग्मतापात, अयथा च सस्थानविषमतेति पञ्चत्रिकमय्या पङ्क्तया त्रि स्थापितया स्थापना कार्या। तया च पञ्चचत्वारिंशदेव, त्रिगुणि ताना पञ्चाना पञ्चदशभावात, त्रिगुणिताश्च पुनस्ते जाता पञ्चचत्वारिंशदेव। घनयुग्मायत तु पूर्वोक्तद्वादशप्रदेशमयेन पङ्क्तिद्विके द्विकपूरितत त्रिस्थानवता स्यादेवेति। यथोक्तकरण समताव्याघाता घनत्वाव्याघातो वा। निरूपितमेव सस्थानचतुष्टस्य प्रतिभेदचतुष्कभावेन जघन्यप्रदेशनिष्पाद्य सस्थानवृन्दम्। प्रतरप- रिमण्डल सस्थान जघन्यतोऽपि प्रदेशाना विशत्यथ। अत्रावधारणीय तावदेतावद्युत--परिमण्डलेऽपि सस्थान ग्राह्यतो भवत्यथ वृत्ता- यामेऽन्तरपि च शुषिर वृत्तमेव वष्टनीय, यद्यपि स्याद्युग्मजघन्यमपि घने तथा चान्त प्रदेशचतुष्कसद्भावाद् वृत्ताकारेण परिमण्डले सस्थाने प्रतरे विशतिश्च च चत्वारिंशदेव स्यु प्रदेशा इति सम्भाव्यते। अयथा येनन्यपरिभावनीय यथागम, नात्र नियमित व्याख्यानात्सम्यचि सूत्रस्येति। न च वाच्य वचमतावल्यव मस्या ताति ? गधरपित्वादीनामप्यातारापा सद्भावादिति। सर्वेषा मत्रगाल्समोत्तान. अथवृत्तापरिमण्डलाध नुत्पानीतामपि स्थन्न

संस्थानत्वाभावात् । न च निष्पद्यन्ते तावद्गुरुगीत्य लक्षणानि समानानाम् । न च वाच्यं त्र्यस्रचतुरस्रेण भविष्यति चतुरस्र, तस्माय पृथक् चतुरस्रसंस्थानेनेति । स्थूलपदार्थानां त्र्यस्रचतुरस्रेण कथञ्चि सद्भावेऽपि प्रदेशनिष्पन्नानां तथा समुन्नितानां तथाऽनुत्पत्तिभावात् । मध्यप्रदेशचतुरस्रस्य शुषिरीभावादेकस्य वा सममध्यप्रदेशस्य कथमप्यनागमात् प्रदेशस्य विभागाभावात् । न च चतुरस्र वस्तुना विभक्तुमपि शक्यते यत स्यात् त्र्यस्रचतुरस्रं ततो व्यवहारेऽपि चाहनिभदान्परिगणनायमेव त्र्यस्रं चतुरस्रं वा पर्यवसन्ना । अक्षरारम्भका वस्तूनि पृथिव्यादिभूतानां संस्थानानि पतद्गुरुद्रव्याण्येव । स्थापयित्वा च षट्त्रिंशत्या संस्थानपञ्चकं यथाक्रममन्वेष्य प्रयोज्यानि । तथा 'फास' त्ति । तत्र स्पर्शन यान्गो स्पर्श । स च गुर्वा दिभेदेनाष्टधा । यदाहु —' फासा गुरु लहु मिउ खर सीउण्ह सिणिद्ध रुक्खट्ठ त्ति । तत्र गत निगरणे' इति तौदादिकस्सस्मादौणादिक "कृप्र ऋत उर् च [७३४] इति विदु, गिरति—पततय धानननि गुरु स्पर्श अध पतनकारण वायुरेव सहचारि कारण, तेन रुद्धवायावनिष्पादर्जलादरपतनेऽपि न नास्त्येव जले गुरुता, अन्यथा वायुरोधाभावे कथ मुच्यते वा पाता जलादे ? कथ न पतत्यकतूलादि ?। न च कथं तर्हि पतनता निश्चितगुरुत्वमपि काष्ठादिवन्न निमज्जति जले इति वाच्यम्, जलस्य यत्तत्स्वभावो (स्वभावो) यस्तेतादृशमधो नयति नतावता तस्य गुरुत्वं न । यत्तु किमु जले काष्ठादे पाषाणादेरल्पमानत्वप्रतिभानं तस्य मानमयमेव वास्तवमिति वक्तुं शक्यते, किन्तु जलस्वभावेनैव तथा प्रतिभाम । केचिदाहु — यद गुरुत्वेनाकृष्यते पदार्थ क्षितितलमध्यबिन्दुनेति, तच्चिन्त्य, । यद्यप्याकर्षणकारणं तु गुरुत्वमेवेति तैरभ्युपगम्यत एव, परं विप्रतिपत्तिरेतावत्येव—यत् गुरुत्वेन पतति,

गुरुत्वं तत्कृष्य मध्यबिन्दुं वा पातयतीति । तत्र यदि गुरुत्वेन पतेत् यथागुरुत्वं कालविलम्बोऽल्पाल्पतरादि, आकृष्येत च यदि तर्ह्याकर्षणं न यथालघु प्रथममाकर्षणात् पदार्थानां स्यात् पातो गुर्वल्पतामनुसृत्य । भवति च पातो यथागुरु अल्पाल्पतरादिकालेन । ततो नाकर्षणशक्तिः । अन्यच्च—क्षितिमध्यबिन्दुनाकर्षणे च न स्याच्छीघ्रगतिकः पदार्थः समतायां भूमौ । अन्यायबिन्दुपरिकल्पनेऽपि च गमनाभावः कस्य मध्यबिन्दोरेव परावर्त्तियेन स्यादवितथमेतत् । यथागुरुत्वाकर्षणेऽपि च विना सम्बन्धं कल्प्यमानो न विद्वज्जनमनश्चमत्करोति । आकर्षणमसम्बन्धस्यैतस्य विप्रतिहतत्वात् लोहं लोहाकर्षस्यायथापदार्थमाकर्षसत्ता प्रत्यक्षसिद्धैव, परं नतावता यथागुरुत्वं कल्प्यमानमाकर्षणं शोभते । न हि सुवर्णस्यानुच्छिद्यमानद्रवताऽस्य तारेनसंयोगेऽपि दृष्टेतीतरेऽपि तथाभूता कल्पयितुं पार्यन्ते प्रवीणेन परमार्थप्रतिपादयित्रा । कश्च मध्यबिन्दुर्भौतिकेन्द्रोऽन्यो वा ? येन च ज्ञातः प्रमाणेनासौ ? कथं च ज्ञाता शक्तिरपि तस्य ? इत्यादि चिन्त्यमेव । अन्यथासिद्धिश्च गुरुत्वेनाकर्षणस्य स्पष्टैव तेनान्वयव्यतिरेकानुविधानात् स्वतन्त्रत्वाभावाच्च । न सहकारित्वमप्युच्यमानं युक्त्यनुरोधीति । एतद्विपरीतो लघुरुत्पतनकारणम् । न च गुरुत्वाभावो लघुत्वं, लघुत्वाभावश्चात्र किमिति नाङ्गीक्रियते गुरुत्वम् । यथा हि उत्पतनकारणं तथैवेदं पतनकारणम् । दृश्यन्ते चार्कतूलादयो लघुत्वेनाकाशमनुधावन्तस्ततो वास्तवमेव लघुत्वं न गुरुत्वाभावरूपम् । किञ्च—यथा हि गुरुः पदार्थोऽप्यपां काष्ठादीनां लघूनामपि यथा निमज्जनकारणं जलादौ तथैव लघुरपि धूमाग्निगुरूणामप्येषामूर्ध्वगमनप्रयत्ने विलोक्यते एव जलयानगृहादीनां यथारूपेणोत्पतनम् पतनाभावरूपतस्य युक्तिमनुसरति । न हि पतनाभाव उत्पतन

मस्तुनाभावो वा पतनमिति वक्तुं नवयेत। यथाऽऽख्याख्यानं तु किमिति गानाञ्ज मुग्दुग्धे सयानवियोगी इत्यादि रवीकरणार्थी एशभाववमेव द्वितीयस्यवोच्यते विमुन। अनमवायिवारणत्वादि विस्तरेऽपि तुल्यमेव। किञ्च—यथा गुरुत्व इति स्यातन्त्र्येण प्रतीतः पदार्थो गुरुत्वया, नयैव न्युरुत्यमित्यपि प्रतीयत एव स्वातन्त्र्येण। न च भ्रान्तेयमिति वक्तुं शक्यम् प्रतीतिमात्रस्य भ्रान्तत्वप्रसङ्गात्। न च बाधकमत्र। यदि च लघ्वारेण नाय गुरु-णि प्रतीत्या वायमुख्यस्य स्वाप्रक्षया वल्प्यत प्रतीत भ्रान्तत्वम्, तुल्यमपि नाय दु ग्मीनि, नीत च नायमाण इति वियुक्त च नाय सयुक्त नति प्रतीयात कि न गुरुत्वीनामपि दु ग्राऽभाव-ताऽनुपपद्यते? किञ्च यदि गुरुत्वाभावस्यवाभिप्रेत स्याल्लघुत्वम्, स्यात्वारागामादग्पि गुरुत्वाभावाविनत्वाल्लघुत्वेन व्यवहार। यदि च स्वतन्त्रमेव स्यान्नियत लघुत्व तत्र तदभावाश्रयाणा देहिकतया लघुतया व्यवहारापत्ति। न च गुणादीनामपि गुण गुणाभावात् गुरुत्वाभावाश्रिता लघुत्वापत्ति। किञ्च—यदि गुरु-त्वाभावो लघुत्वं तदैव चापतनाक्रमणमित्यभ्युपगम्यते न स्यात्तू-र्ध्वगमनं प्रभाया आगमनमेव। स्यात्त्वाग्निमात्रस्योर्ध्वमेवाव तूलादीनामिव गमनम। तथा चानायस्यैवायुष्मन्वासाना सन्त पतमसवलया स्यातन्त्रतास्य नमिद्धव। यत्र च विद्युदादौ पातो तुभनगिदापि सङ्क्रमनीयो गुरुत्वाभावमात्रेणापतनवादिभि। तस्माद नथानियमाभावात्पदार्थानां विचित्रस्वभावत्वाज्ज्वालाग्ने रूर्ध्वज्वलनं विद्युत्प्रकाशसूर्येन्दुप्रभाणां चाविरुद्ध समागम। न च वाच्य नयमग्निवदूर्ध्वगमनस्वभावो जीव नमनिमुक्तो गच्छ त्यूर्ध्वमालोकान्तात्स्यादगत्या समयतनि तथा यद्वृक्ष ज्वलति ज्वलन इति चाच्यमान ...

एवाभिधानान्निशब्देन । यदाहु –"यथाधस्तियगूर्ध्व शेषुव मिवीचय" इति । तनास्मात पदार्थस्वरूपानुसारिणामस्ति णवर्णिका विहाय मिथ्यात्वाधितचीपूर्तामसती दूषणावलीमि तथा 'मदु'रिति । तत्र "मदन क्षादे" इति नर्यादिका धातु स्माच्च "पृकाह्वृविषुपीपिकुहिमिदिविदिमृदिव्यधिगृध्यादि वित्' इत्यौणादिके विदौ मदुरिति । मृदनाति च मदु स्प दु ख, सुपसाधनत्वात्तस्य, यवनाता वा कामलपाषाणादिना घप कामलतोपलम्भात् ततो मृदुता । न च वाच्य सयागविशेष एवा न तु गुण इति । सयागविशेषमात्रेण तदनुत्पत्त । अस्तु वा सय गविशेष कारणम, पर नतावता तस्य तन्मयत्वम्, मृदु पाषाण इत्यादेरनुभवात । मृदुतूलिकादीना च स्पष्टव सुखसाधनतेति नायमपलाप्य प्रमाणेन पदार्थ प्रतितिष्ठापयिषुभि । अन्यथा पुद्गलसयोगजत्वात्सुखदु खजीवितमरणाना न तेषामपि पदार्थता वास्तविकी स्वीकार्या स्यात, तस्म मृदुत्व गुण । तथा "खर'त्ति । खरा मृदुविपरीत । खन खनन' इति भौवादिकस्तस्मात् 'जठर शवरमकरशङ्करकर्पूरवपरतोमरप्रामरपामरप्राचरसगरनगरतगरा दरादरमृदरदुदरदरनुपु दरगोवैराम्बरमुखरखरडहरकुञ्जराजग रादय '[४०३]इतिसूत्रणौणादिकेन डिरप्रत्ययनिपातनेन खर इति। केचित्तु आतो डाञ्ह वावाम " [५।१।७६] इतिसूत्रण डप्रत्ययमा- मत्य ख-इन्द्रियं राति–अभिभवतीति खर इत्यप्याहु । यतो न हि पाणिनीये स्वादिपु ऋजादिपु बोपात्त खर इति तेषामावश्यकमेव व्युत्पादनमिति । न च मदुत्वाभाव एव खरत्वम्, स्पष्ट दु खसाधन त्वात पार्थक्य तस्य । तथा दश्यन्त एव पाषाणादय खरताप्रभवा । न चतेऽभावप्रयुक्ता इति । तथा "सीय"त्ति । शीत, तत्र शरत इन्द्रियाणि स्तब्धीभावादनेनास्मिन् वेति शीत । 'शीङ्ग स्वप्ने"

त्वागन्दिस्तस्मात् "चोरीभूदूमूपपा" ० [२०१] इत्यादिनौणादिव क्ति प्रत्यय । तथा च शीत इति । स्पर्शत्वाय स्पर्शविशेषतया । न ह्यननुभूत केनाप्यस्ति शिशिरजडनोद्भवमगाम, यो विप्रतिपद्यतत स्मिन्, न वा विना जीवन जीवति कश्चिदमुमथोऽप्रत्यपदेनम् । तथा "उष्ट्"नि । उष्ण , ओषति दहति शरीरादिकमित्युष्ण "उषु दाह" इति भौवादिकस्तस्माच्च ' ग्रवीह वाःपुष्पि इत्यौणादिके क्विति न उष्ण इति सिध्यति । दहति चोष्णमेन्द्रियादिकं स्पष्ट चेदमिति न विप्रतिपत्ति । तथा ' सिणिद्ध 'त्ति । स्निग्ध , "ष्णिह्यौच स्नहने" स्नह्य यास्वादयन्तमिति स्निग्ध ,"अषमकर्मणि भुज ' [५।१।११] इति कर्तरि "गानेष्छाचाय" इत्यादेराकृतिगण वाच्च वर्तमाने क्त "मुहद्रुहस्नुहस्निहा वा" इति घे 'अघस्वतुर्थात् इति तस्य धत्व स्निग्धो घनादिगत स्पर्शविशेष । तथा रुक्ख'त्ति रूक्ष , तत्र "रूक्षण पारुष्ये" इत्यद तच्चौरादिक परस्मैपदी । स्निहादि-त्वादचि रूक्ष , रूक्षयति चप स्पर्श आस्वादयत्यनभिप्रेतत्वात् पाप प्रकृतितया च गण्यते अत एव 'गुरु खर रुक्ख ' इतिवचनात् । एतेऽप्यर्थपि स्पर्शा । ननु शीतोष्णयोर्भवतु स्पर्शत्व, गुरुलघुमृदु खरस्निग्धरूक्षाणा कथ स्पर्शत्व ? यतो न तावद् गुरुलघू स्पर्श मात्रवेद्यौ, तेषामुत्पाटनेन सञ्चालनेन वा बोधात्, स्पर्शाभ्या तु वस्यवाह्यौ, य स्पर्शमात्रेण वेद्यते यथा शीतोष्णौ । तथा मृदुखर योरपि न केवलस्पर्शमात्रवेद्यतास्ति किन्त्विहापोहगम्यावेव । तथा स्निग्धरूक्षावपि । तत्ते स्पर्शयोर्दिनु योग्या यदिति चेन । सत्य ब्रूत तावत्केनैमे वेद्यन्ते ? मनसा तु न केवलेन, सहोपयोगे तु किं न शब्दादिष्वपि तस्योपयोग ? असाधारणत्वेन यथा तत्र श्रावणत्वादि, तथवात्र किं न स्पाशनत्वादि ?। किञ्च-गुरुभारा दिना श्रमण श्रान्तिघर्षण दाहश्च नार्येन्द्रियाणा बाधाकर , किन्तु

स्पर्शनस्यैव विषत्ते बाधाम। आपेक्षिकत्वं च शीतोष्णयोरपि,अन्यो न्यापेक्षया व्यवह्रियत एव ते,न तावता स्पार्शन (स्पर्श) त्वमेषाम्। ननु च स्पर्शनेन्द्रियज्ञेयाना स्पर्शत्वे कि सङ्ख्यासंयोगवियोगपृथक्त्व परापरत्वादीना न स्पर्शत्वमुच्यते इति ? चेत्। सत्य, पर न ते संयोगाद्या केवलस्पर्शनवेद्या गुरुत्वादीनामिव, किन्तु स्पर्शनेन चक्षुषा चेत्युभयेन्द्रियवेद्या । न च वाच्य उष्णशीतादि वेद्यते जिह्वयेति नियम सदपि स्पर्शतयाऽग्राह्यतुमुचितमिति। न रसना स्पर्शनरहितेति सहचरन्ति प्रतिभासते शीतोष्णादि, पर तत्स्पर्शनेनैव ज्ञापितम्, तस्या रसादेरेव ज्ञापकत्वात्। ननु च कथमष्टावेव स्पर्शा आख्यायन्ते ? । यतोऽगुरुलघ्वमृदुकर्कशानुष्णशीताऽस्निग्धरूक्षाणामपि स्पर्शाना सद्भावादिति चेत्। सत्य, न तावद्वेद्यमगुरुलघुत्वम अमूर्तानामिन्द्रियेणावेदनात्तद्गता मूर्ताना च द्व्यणुकादीनामपि तद्गता मवेद्यासौ स्पर्शगोचरोऽगुरुलघ्वाख्य स्पर्श । पठ्यते चात एव परमाणौ स्पर्शद्वयमेव । यदाहु –

'कारणमेव तदन्त्य सूक्ष्मो नित्यश्च भवति परमाणु । एकरसवर्णगन्धो द्विस्पर्श कार्यलिङ्गश्च ॥१॥" इति । स्पर्शद्वयं च शीतोष्णयो स्निग्धरूक्षयोर्मध्ये एकैकेन भावात्। गुरुलघुमृदुखरास्तु सहत्युत्पन्नास्तथा नामृदुखरत्स्यापि पाठो युक्त । तथा(न) कोऽपि पुद्गलस्कन्धोऽणुर्वा शीतोष्णस्निग्धरूक्षयोरन्यतमेनान्तरेण हीनोऽस्ति, येनानुष्णशीतादि स्पर्शो व्याख्यायेतेन्द्रियावरणक्षयोपशमतीव्रत्वाभावाच्च मन्दो नायाति गोचरम्। नतावता न स ,अन्यथा परमाण्वादौ रूपाभावाभ्युपगमप्रसङ्गात्। न च वाच्य मुष्ण स्पर्शोऽनलस्य शीतश्चोदकस्येति पृथिवीपवनयोरनुष्णाशीतस्पर्शवत्त्वमभ्युपगम्यमेव, तथा स्पर्शवत्त्वाच्छीतोष्णयोरभावादयोगाच्चेति । शीतवातादौ पदममात्रमप्यन्वेदिनान्नाहिंश्च

पाषाणादौ शीताद्युपलम्भात् । अग्निकणा जलकणाश्च तत्र प्रविष्टा इति चेत् ? किं जलानलयोर्विरोधोऽपि विस्मृत ? न चाकाशादौ चन्द्रकान्तमण्यपि शीतादयस्मिन् यदापि स्पर्श उपलभ्य । मूर्तेष्वेव स इति चेदस्तु मूर्तगुण । अन्यथा द्रव्यनिष्पन्नात्कल्पयत उष्णात्स्पर्श-स्वत तदभाव च नोष्णो न वा शीत उपलभ्यत इति पथ्यादीना-मनुष्णाशीतस्पर्शवत्त्वमेव यात्कमिति चेत्तस्त्रम शीघ्रतत्तत्स्पर्शे तत्कारणतायास्मिन्, पर नवायत्र नव स्पर्शो न वामौ न शीत स्पर्शा वा अग्नि च चन्द्रादौ पार्थिवे माणिक्ये न शीतोष्णौ स्पर्शावु-पलभ्यमान वायावपि च । न चानुष्णाशीतात्मतत्सङ्गावयान कोऽप्यय स्पर्शविषयतामागच्छति । यद्वाऽन्न पार्थिवाणूपादानत्वादुत्कस्य तु वायुपार्थिवत्वात् किमिति तत्र यद्द्रव्य मिति नियमेन न तत्-स्पर्शावस्था, चन्द्रार्कवासानलादुदकाग्न्यादिद्रव्याद्वा चेत् पार्थिवत्व-स्यानुष्णाशीत एव स्पर्श इति यत्तु युक्तम् । तथा 'ठाण' त्ति । स्थीयतेऽस्मिन्निति स्थानमवगाहना "धरणाधारया" इत्यन । तच्चवस्य प्रदेशस्य परमाणुसञ्चितस्यकस्मिन्नाकाशप्रदेशे द्वयणुक-त्र्यणुकयावदनन्तानन्ताणुकस्क धस्यापि । कथमेतदिति चेत्, यस्मा-त्सुवर्ण पारद । पूर्वमेव प्रतिपादितमत मा विस्मार्षी । आह च--

'एगेण वि से पुण्णे दोहि वि पुण्णे सय पि माएज्जा । कोडि-सएण वि पुण्ण कोडिसहस्स पि माएज्जा ॥१॥ इत्यादि । अन्यथा प्रत्यक्षसिद्धानामनन्तानन्ताणुकस्कन्धानामप्यवगाहनानुपपत्ति । तथा द्व्यणुकादीनामाकाशप्रदेशाद्ययावगाहनमपि स्वानभिन्ने प्रदेशेऽसङ्ख्येयप्रदेशावसानमेव चावगाहनम् तावत एव तावन्ति । अन्यथा च न गति पुद्गलाना, न च स्थित्यवगाहन, यत चन लोकाकाशेऽवगाह एकप्रदेशादिषु भाज्य पुद्गलानामिति तत्त्वा-र्थसूत्रयुगलपर्यालोचन स्पष्टमभिप्रेति । अत एव च आह

षट्ठाए चउट्ठाणवडिए' त्ति पारम्पर्यमपि सङ्ख्येया सङ्ख्येय
भागगुणहान्या सङ्ख्येयासङ्ख्येयभागगुणवृद्धया वा चतु स्थानपति
त वमुस्थापयस्तदेव वक्ति । षट्स्थानपतित अन्यथा प्रतिपादयेत,
अनन्तभागगुणहानिवृद्धिसद्भावात । स्थान वा स्थितिस्तद्रूपतया
स्थानपाल स तु द्रव्यार्थतया पुदगलानामनाद्यनन्त । यतो न हि
जहति पुद्गला पुदगलता मूर्तानाममूर्तत्वेन परिणस्वभावान्
पर स्व घादिरूपापेक्षयाऽस्यैव स्थितिनियम, यदपेक्षया पर्याय
परिणति पुदगलाना विचित्ररूपोपलभ्यमाना घटापोटिमादीक्षते
तच्च परमाणोरारभ्य यावदनन्ताणुकस्कन्धाना जघन्यत एव
समय उत्कृष्टतो सङ्ख्यात काल । ध्रुत इति चेत्ताव यतिनान्तेऽ
हृस्यन्य परावृत्ते । अत एव च स्थित्यपेक्षयापि चतु स्थानपतित
रथमण्वादीना गीयते आगमे । न च विमानादितया परिणताना
पुदगलाना शास्वतभावाद्वाभ्योऽनाद्यनन्ताऽपि काल स्थितितयेति
न हि तत्रावस्थिता एव परमाणव स्कन्धा वा, किं तु गिरिसरि
त्प्रवाह यायना या याण्वादिसमागमो नियमश्च प्रावतनानामि
नान त कालाऽभिप्रेय स्थितितया । एव च शाश्वताना मजीव
त्वेऽपि जीवानामपरापरेषामुत्पादादावपि सति न तद्रूपपरिणवान
म शाश्वतत्वम साधारणाना चाच्छिन्नानामप्य तमुहूर्तमायुरपटम
तम नूतननूतनानामुत्पादात् । दृश्यते च छिन्नानामपि साधारणान
गृहादावपि पल्लवाद्युद्गमा गुडूच्यादीना तादृश एव स्वभावस्ते
य स्वयोग्यमाहार समीरणादिभ्योऽप्यादने वर्धते च । तथा च
हानिर्वीननवीनजीवोत्पादे प्राक्तनव्यये तु न कोऽपि विवा
इत्यपि प्रतिपादितमेव नयम् । एतेन नामरादिकुण्डलादीनाम
शास्वततया जीवविन त्व मैवल्पुदगल्पयत्व
तथा 'भइ' त्ति गम्यते इति गति, स्निग्धा

"गमा" शब्दनुनाम्निरुक्ति च प्रविर्गित्ति । सा [illegible]प्रथाग सूत्रप्रदस्य[illegible]दुर्गाउत्वगत्यादिभेदेन । न च वाच्य यदमचेतनतया- दनुना गति [illegible]पार्दिहन शक्तयामिति । नहि क्रिया चेतनाधरत्वन व्याप्ताि नियम [illegible] छद्मानुप्रभापिज्जर्गिनजा[illegible]वादी स्पष्ट गतिमत्त्व[illegible]नुपलम्भात् । न च नियता गतिस्तेषां तत्र येन वाय्वादिनियता मा भवत्, अभावे चाणुना गत्यादे यथ पटपट नगादे पुराननीभावेन जजरीभाव गुम्फ्यत, गन्धाघ्रान्यो गोत्यधरन् विलासरैन्य । न चमत्कुन्गन्गाा गत्याद्यभाव युक्तम् । यय च प्रतिथम्नु परमाण्वपचय प्रत्यक्षमिद्धाऽभ्युपगतो वा युज्यते । न द्व्यणुकादिव्यापत्ति परमाणूना गत्यभावे प्रत्यक्ष च विगायते गृहधनूरादीना परिणतिनियुक्तता चति स्वीकार्यैव पुद्गलाना गतिमत्ता, अपथा सूत्राच क्रमगा[illegible]पि नैवावाप्नुयात् भू[illegible]ग । मद्दृग[illegible]प्यपरम्याने, तत्र व्यवहारिणामनुपतति पारमप च–

'नणं परमाणूपोग्गले लोगस्स पुरत्थिमिल्लाओ चरिमंताओ पच्चत्थिमिल्लं चरमंतं एगसमएणं गच्छइ पच्चत्थिमिल्लाओ वा चरिमंताओ पुरत्थिमिल्लं वा चरमंतं एगसमएणं गच्छति दाहि णिल्लाओ चरमंताओ वा उत्तरिल्लं चरमंतं एगसमएणं गच्छति उत्तरिल्लाओ वा चरमंताओ वा दाहिणिल्लं चरमंतं एगसमएणं गच्छइ' इत्यादि । न च कथमेतत्सम्भवि गतिमत्त्वेऽपि पुद्गला- नामेतादृक्शीघ्रगत्ययोगादिति शङ्कनीयम् । यतो विद्युत्प्रकाशा यथा पुद्गलमय एवाल्पक्षणानि विदव विश्व स्वर्गात्रिषा क्षणन । यद्वा–विद्युद्यन्त्रयुक्ता ध्वनि [illegible] समस्त गतावधिरान् श्रागानतिक्रम्य पुनस्तत्रैव तदैवापश्राम्यम् विलोक्यते । एतच्च स्थूल दृष्टया स्थूलस्य धाना यदि प्रदयते, का वार्ता तर्हि परमाणुतामता परमाणूना, गुरु[illegible]भ्याप्यभावस्तत्र यत । तत्र यथार्थप्रतिपादन

परमागमप्रणनपरमपुरुषगुणवेदिना श्रद्धावता किमिति शङ्कनीयम् यथार्थवस्तुस्वरूपे ?। एव च वर्णादीना द्वन्द्व । एते च द्रव्यगुण इति सूचिता गुणा व्याख्याता । सस्थान स्थान गतयश्च परिणाम रूपा अपि कथञ्चिद् गुणत्वमप्यनेषामिति सप्रधाय साहचर्याद्बोधता। नन्वतस्तु वर्णरसगन्धस्पर्शा इत्येव गुणा, स्पर्शस्य च यथानुलोम्यादिना यत्र पाठ । तथा चैषा चतुर्णा गुणत्व तेषाणा च परिणामत्वम । यद्वा–अत्र न द्रव्यगुण इत्यादिविभागो लोकव्याख्याते, किन्तु सामान्येनैव पर्यायलोकव्याख्यायति न विचारकणिकाऽपि। वर्णादीना च परिणामत्व तु पूर्व प्रतिपादितमेव। तथा वर्णभेदा। वर्णाना कृष्णादीनामुपलक्षणात् रसादीना तिक्तादीना भेदा अवान्तरप्रकारा सयोगजा परिणामविशेषा वा पूर्वोक्ता रूपादीना, पश्चाद्वर्णादिना द्वन्द्व द्वन्द्वित वर्णरसगन्धस्पर्शसस्थानस्पर्श स्थानगतिवर्णभेदा इति। वर्णभेदपार्थक्य च पाषाणमुपलक्षणत्वात्। यद्वा–समस्तानामेव एव द्वन्द्वो, भवति चाभिप्रेतानामेकसमासान्तगतानामपि अष्टाध्यायिविनिर्मुक्ततदुत्थगुणभूतय इत्यादावेव प्रक्रम्यमाणानामपि ग्रहणम्। चकार परिणामानामानन्त्यज्ञापनाय। यद्वा–सावान्तरभेदाना भेदाना समस्तानां परिणामत्वज्ञापनाय। किमित्यवमित्याह –' परिणाम अ यद्विह 'त्ति । यद्वा–वर्णादि कानिति द्वितीयान्ततया व्याख्येयम्। तथा च वर्णादिकान् बहुविधान परिणामानित्यर्थ । परिणमन पूर्वावस्थापरित्यागेनाव स्थान्तरगमन नार्थान्तरगमो यस्मात्स्वकथैव न चागम" इत्यादि वचनात् मूलवस्तुस्वरूपस्य च च्युति परिणाम इतिलक्षण । ते च बहव अपरिमिता आनन्त्यादेव तेषाम्। न ह्येकगुणकृष्णत्वादिविवक्षया परिगणितु पर्याया शक्यन्ते क्षमितमद्भिरपि विधा –प्रकारा, रसादानामपि तथाभावात् प्रकारपर्यन्तानुधावन

येषा ते वर्तुविधाम्तानिति । योजना तु पूव विद्दितव । चकारश्चात्र न केवल, उक्ता मादिरा एव परिणामा किन्त्वयसान्दिरा अपीत्यनुक्तानाम्पिरिणामसूचनाय । तान किमित्याह–"पज्जवलाग वियाणाहि"त्ति । पर्ययन–अन्यस्वरूपापरित्यागेन परावसन पर्याय पर्याया या, स एव ते वा लोको लोक्यमानत्वाद द्रव्यादौ प्रत्ययाद्वा लाक पयायलाक । प्राकृते हि निल्यनादेरपि एककार्यलेन- भावात । पयोदरादित्वा च ककारलोपादि । एवमेव श आलुवरइ पञुस्द एवरद मलवइ य एगन्ठ त्यत्र प्रणीतकाथना घन्ते । लोकघातोविशेषणेण भिन्नाभिधायत्वावक्तनामभिप्रत्य नथकायनाद मान, लोक ल्यायोपयुक्ताऽष्टमा भन पयायलाकस्तम । विजानीहि- विविधहेतुयुक्त याविभि प्रकारजानाचावबुध्यस्व । न हि वचनगौ- रवमात्रेण ग्राह्य वचन माभकम किन्तु हेतुयुक्त्याग्निाऽविरुद्धत्वेन निश्चित्य, आप्तापमनुत्तरडष्टमदष्टव्विराध । मिरयवविधम्य वाप्तागमत्वपरत्वात । एव च पयवसितम् पयायलाकस्वरुप, तस्य नसानाच्च लोकनिक्षपाष्टक पयवसितम तथा चात्तरित मतिवि- धस्वासावित । लोकभेदनिरूपणाय चववविधोऽतिविस्तत क्वचित् प्रस्तुतवदाभासमानो विदुषा हास्यास्पदमवबास्पद चेद्बबाधाना मुद्रजवदध वीथवायासहिष्णूना पत्र घाऽस्ति । क्षन्त्व्योऽयमागा- र्विहितयथाश्चित्विधानामस्माकम कवल वक्तव्यवक्तव्यादि विवेच्यमान मीदृग लावमपन्य युज्यत इनिविचारापयागित्वमा- त्रणतावता न्मिहतो निव धम्याभिधानात । विधीयते चाभियु क्तनररपि निर्युक्तिभाष्यविधानबद्धावधाधागमि पूज्यपादरपि अप्रस्तुतनिराकरणपूव प्रस्तुतस्यावगमायव यथार्थतया निक्षपादि । ततो नापवनणीयमिद, आवश्यक च लाकस्वरुपस्य यथावत्परि ज्ञानमिति विस्तना भदानुभेदा इति ।

॥ सम्पूर्णो स्तोत्रविंशिकाविवरणस्य खण्ड उपोद्घातप्रत्ययश्च ॥

नमोऽस्तु सूरये तस्मै यदुपज्ञावलम्बनात ।
यथामत्यज्ञबोधाय लेशस्वरूपमाततम ॥१॥
सिद्धा तात्तोणमुदित मत्या मान्द्यात्सुबोधरहिततया ।
मिथ्या तद्दुष्कृत मे भूयाद्बुद्ध्या च बोधियुत ॥२॥

